No. १५२९ क

Title विंशतिभाष्यम्

Author श्रीशङ्कराचार्यः

Extent ६० पत्र Age सं. १९५९

Subject वेदान्त

नं॰ ४८

विंशतिभाष्य नं॰ १२९

3

5957

F — 69

Complete

[illegible]

न. १५२४ [illegible]

[illegible]

सं. १८ [illegible]

देव्याः त्रिशत्यर्थप्रकाशटीका



त्रि
वि
१

ॐ श्रीगणेशाय नमः ॐ श्रीगुरवे नमः ॐ ललितायै नमः
ॐ वंदे विघ्नेश्वरं देवं सर्वसिद्धिप्रदायिनं वामांकारूढ
वामाक्षीकरपल्लवमर्जितम् १ पाशांकुशेक्षुसमरं
जितपंचशरां स्वपाटल्यशालिसमसमांचितगात्रवल्ली
प्राचीनवाक्स्तुतपदां परदेवतां त्वां पंचायुधार्चितपदां
प्रणमामि देवीम् २ लोपामुद्रापतिर्नत्वा हयग्रीव
मयीश्वरम् श्रीविद्याराजसंसिद्धिशालीपंकजवी
क्षणा ३ विस्तारितां वहुविधां वहुभिः कृतां च टीकां
विलोकयितुमतिमंतां जननां नवत्यसर्वपदयोग
विवेकभाजः तुष्टौ करोमि ललितापदभक्तियोगात् ४
वक्षकालं स्वगुरुमहिम्नागुरुपादमवलंव्यस्थितस्य
य ॐभयोनिम्नयेशिवदंपतीकृतनामशतत्रयो
क्तौ प्रेरितो हयग्रीवउवाच ककाररूपेति कका
रः कवर्गाद्यरूपज्ञापकविशेषणं यस्याः साकादि
विग्रहेत्यर्थः अथवा ककाररूपं वाचकं येषां ते
ककाररूपा हिरण्यगर्भउत्तमांगमुदकं मुखादि
अहिरण्यगर्भनिष्ठजगद्धारकत्वजगत्कर्तृत्वादि

गुणत्वं ककारस्य व्यंजनादिवर्णत्वेन वर्तत इति तद्व
च्यतया तथा हिरण्यगर्भः समवर्ततताग्रे इत्युदकत्वे
श्रुत्यादिना जगत्संजीवनहेतुत्वमपि ककारस्य
विद्याग्निस्वर्णतयास्तीति तद्रूपा वा सर्वेषां प्राणि
नां शिरस्युदन्तमस्ति योगमार्गेण कुण्डलिनीग
मने तत्रत्यतत्त्ववाहप्लुतयोगिनामीश्वरसामग्र्यं जायत
इति योगशास्त्रेषु प्रसिद्धं तद्वत्कवर्णो मन्त्रादिस्वभा
गस्यः तत्स्वरूपपरायणानां शिवभावमेवेच्छती
ति वा तद्रूपेत्यर्थः ॐ ककाररूपायै नमः १ कल्या
णी कल्याणानि सुखानि सार्वभौमानंदादारभ्य ब्र
ह्मानन्दपर्यंतं तैत्तिरीकादौ प्रतिपादितानि तदु
पाधिभेदेष्ववच्छिन्नस्वरूपतयानानि कल्याणशब्द
वाच्यानि एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुप
जीवंतीति श्रुतेः समष्टेर्व्यष्टित्वमुपहितस्वरूपेण
संभवन्तीति समासोपपत्तिस्तथा च गौरी शिव इति
वत्समासान्तर्गतषष्ठ्यर्थे भेदस्याविवक्षितत्वादानं
दैकविग्रहवतीत्यर्थः विज्ञानमानन्दं ब्रह्मेति श्रुतेः

त्रिकूटचलस्वरूपलक्षणवतीत्यर्थः ॐ कल्याण्यै नमः
कल्याणगुणशालिनी कल्याणस्वरूपकर्तारो ये
गुणाः सत्यकामसत्यसंकल्पत्वसर्वाधिपत्यसर्वो
पासनात्ववामनीत्वभामनीत्वादयस्तस्याः शालयं
तइति तथा एनां शोभयंतीति तथा तैः शालंतेता
मिति कल्याणगुणशालिनी अस्मिन्नमासे देव
तायाः पराधीनगुणवत्वं स्वतः शुद्धचैतन्यत्वं च सू
चितं कल्याणगुणैः शाल्यते इत्यत्र गुणवत्वमात्रं
देवतायाः द्योतते तस्योपाधिकत्वं वैदिकमपि स्त
तीनत्वप्रकटनेन दोषाय यदि गुणानामारोपित
त्वेन तत्संकीर्तनस्य भेदबुद्धिसमये तत्कृपाप्रा
प्तिहेतुत्वेनावश्यकत्वं तथापि तदपवादश्रुतः
सरशुद्धचैतन्याभेदध्यानरूपमुख्यभजनं मुख्य
मेवेति संपादयितुं स्वगुरूपदिष्टमार्गेण सु
करमेवेति नातिविस्तार्यते ॐ कल्याणगुणशा
लिन्यै नमः ३ कल्याणशैलनिलया शिलानां वि
कारः शैलः शिलोच्चय इत्यर्थः कल्याणं स्वर्णमे

वशैलो घनीभूतमित्यर्थः तस्मिन्कल्याणशैलेस्व
स्वरूपे आनन्दघननिलयिनि तिष्ठतीति कल्या-
णशैलनिलया सभगवः कस्मिन्प्रतिष्ठितइति
स्वेमहिम्नीति होवाचेति श्रुतेः देवदत्तः स्वस्मिन्ने
वस्वयंवर्तत इति लौकिकप्रयोगाच्च देवतायाः
स्वस्वरूपेस्वावस्थानंयुज्यतेइति कल्याणमेवशै
लवद्घनीभूतंकल्याणशैलआनंदमयकोशः
कल्याणशैलोनिलयंयस्यासेति बहुव्रीहिसमा
सेनविरुद्धः ब्रह्मपुच्छंप्रतिष्ठेत्यतः श्रुतिसामा
न्यात् अथवा कल्याणशैलोमहामेरुर्निलयंशृ
ङ्गंयस्याः सा तथा सुमेरुमध्यशृंगस्थेत्यर्थः
गेंकल्याणशैलनिलयायैनमः ध कमनीया पर
मानन्दस्वरूपत्वेन परमप्रेमास्पदाह्यकोह्येवान्यात्कः
प्राण्याद्यदेषआकाशआनंदोनस्यादिति श्रुतेः
सुखस्यमनोहरत्वेनसर्वेषामाविषयमवन्मयाद्भुतानां
सुखप्रापकत्वेनस्वेष्टदेवतासुशीघ्रमतिशयेनतत्सुज
नादौ प्रवर्तनात् तत्फलदानेनमनोहरत्वाद्वाकमनी
यात्वानितामानंदघनीभावात्मकसुन्दरमूर्तिमत्त

त्रि· पावाकमनीया ॐकमनीयायैनमः ५ कलावती
३ कलाःशिरःपाण्याद्यवयवाश्रुतःषष्टिकलाविद्या·
रूपावा चंद्रकलावा भक्तध्यानाद्यर्थमस्याअस्तीति
3 कलावती ॐकलावत्यैनमः ६ कमलाक्षी कमले
इवाक्षिणी यस्याः सातथा कमलायालक्ष्म्या अक्षि
णा ह्येनतन्निमित्तेनलक्ष्यते विषयवतासंबंधेनन
हूनी केब्रह्मखंब्रह्मेतिश्रुतेर्देहाकाशस्य स्त्र्व
स्वरूपत्वेन परप्रेमास्पदतयाभिलाषविषयत्ववत्वका
रोप्यस्तीति प्रीतिविषयमूलमंत्रादिमातरतयाभ्य
र्हितत्वात् इतिवा कमलायाये क्षिकाभुक्षिकक्रिया
हेतुभूते अक्षिणीयस्याःसेति स्वकीयवीक्षणमात्रे
ण महदैश्वर्यप्रापिकेतिभावः ॐकमलाक्ष्यैनमः
कल्मषघ्नी कल्मषानिपापानिहन्तिनाशयतीति
कल्मषघ्नी अहंत्वासर्वपापेभ्योमोक्षयिष्यामिइ
तिभगवद्वचनात् अथवा वेदांतमहावाक्यजन्य
साक्षात्काररूपब्रह्मविद्यावा ज्ञानाग्निःसर्वकर्मा
णिभस्मसात्कुरुतेतथा नसपापेनकर्मणेतीति
श्रुतेश्च ॐकलावत्यैनमः ८ करुणारसतसागरा

करुणयाकृपयाज्ञातं यदमृतंमोक्षरूपंतस्यसागर
इवसागरो यथामृतसमुद्रः स्वयममृतरूपःसन्
स्वानपिलोकानमृतपायिमेघादिविमुक्तामृतेन
सञ्जीवयतीतितथा ब्रह्मविद्ब्रह्मैवभवति ब्रह्मवि
दाप्नोति ब्रह्मेत्यादिश्रुत्या स्वयममृतरूपासती
लभतेचततःकामान्मयैवविहितान्हितान् इतिभग
वद्वचनेनतत्तदधिकारीकर्मोपासनादिफलस्य देव
तायापरणीयस्य तत्तदधिकारिणा तत्तत्फलंस्थिर
मितिसंभाव्यतेइति सागरोपमामृतवत्संजीवती
करुणाकरुणामृतं करुणामृतस्याभिन्नाश्रय-
त्वात्सागरा करुणाचभक्तिविषयकपरिपाल्यता
बुद्धिः यद्वा करुणयाकृपयाऽमृताः शाश्वतकी
र्तिमन्त्रेनब्रह्मादिलोकंगताः सागराः सागरराजवं
श्याः यस्याः सातथा यद्वा करुणयादयया देव
ना अमृता यथा(सा)सागरासमुद्रोयथासाभागीरथी
करुणामृतसागरा ॐकरुणामृतसागरायैन॰
कदम्बकाननावासा कदम्बनामकवृक्षविशेषः
यद्वाकं यत्काननंवनंतत्रवासोगृहंयस्याः सा ॥

त्रि· ॐ कदम्बकाननावासायै नमः १० कदंबकुसुमप्रिया
कदंबानां कुसुमानि तेषु प्रिया प्रीतिमतीति याव
४ त् यद्यपि प्रियाशब्दः प्रीतिविषयवाचकस्तथा
प्यत्र कुसुमजन्यप्रीतेरभावेन तद्विषयताया वक्तु
मशक्यत्वात् तथोक्तं ॐ कदंबकुसुमप्रियायै नः ॥
कंदर्पविद्या कंदर्पस्य विद्या चेति विद्या तन्निष्ठत्वं
ब्रह्मैकज्ञानमित्यर्थः अथवा विद्याप्रापकत्वात्त
था देवी उच्यते ॐ कंदर्पविद्यायै नमः १२ कंदर्प
जनकापांगवीक्षणा अपांगाभ्यां वीक्षणमपां
गवीक्षणमीषद्दर्शनमिति यावत् कंदर्पस्य ज
नकमपांगवीक्षणं यस्याः सा अनेन नाम्ना येषां
जनानामपि कुरूपिणां जनानामुपरि सकृदीषद्वीक्ष
णमभिजायते ते कंदर्पवद्रूपयौवनसामर्थ्यल
क्ष्मीभाजो भवंतीति ध्वनितं यद्वा कंदर्पस्य जनकः
श्रीनारायणः स यस्या अपांगवीक्षणे ईषद्भ्रूवल्ली
चलने वर्तते यस्याः आज्ञामात्रवश्यतया महावि
ष्णुर्जगद्रक्षणादिकार्यं करोतीवानयेति अथ
वा कंदर्पजनका महालक्ष्मी यस्या अपांगवीक्षणे

ऽर्थस्तयावर्ततेसा तथाकंदर्पस्यमन्मथस्यजन
काउत्पादकत्वाचन्दनादिभोगविषयास्तेयस्याअ
पांगवीक्षणाद्भवंतिसातथा अथवा चंद्रस्यवाम
नेत्रत्वया अपांगवीक्षणंचन्द्रिकोच्यते कन्दर्पज
नकअपांगवीक्षणंयस्याः सा कंदर्पजनका
हेनलक्ष्मीनिवासकमलंलक्ष्यते तद्वदपांगकामा
क्षीकमलादीत्यर्थः तन्निरूपणलक्षणंलोकसं
जीवनंयस्याः सा तथा ॐ कंदर्पजनकापांगवी
क्षणायैनमः १२ कर्पूरवीटीसौरभ्यकल्लोलित
ककुप्तटा कर्पूरयुक्ताश्चवीटयश्चतांबूलकवलास्ते
तासांसौरभ्यैस्तैः कल्लोलितानि प्रसक्तपरिमली
कृतानिककुभादिशोतटानिप्रदेशायस्याः सा
मुखवासितपरिमलेनजगन्मात्रंसुरभीकृतमि
ति स्वरूपातिशयोक्तिरस्मिन्नामनिव्यज्यते
महाराजभोगवतीत्यर्थः ॐ कर्पूरवीटिसौरभ्य
कल्लोलितककुप्तटायैनमः १४ कलिदोषहरा
कलौक्लिश्यमानानां पुरुषाणांजन्ममात्रे
णायेदोषाः पापान्यायान्तितान्दृष्ट्वाश्रुताकीर्ति
ता स्तुताश्चपूजिताध्याता सतीहरतीति तथाकले

त्रि
वि
२
S

रन्योन्यवासिनां कलहानन्तममताभिनिवेशावशा
ज्जायमाना ये दोषाः परब्रह्मविषये अस्तित्वनास्ति
त्वदेहादिव्यतिरिक्तत्वभिन्नत्वगुणितादिसाधक
युक्त्याभासतदनुगुणसंमत्याभाससङ्गतितात्पर्य
विघटनान्यथाकरणाद्दुराग्रहजन्यकामक्रोधपु
रुषवशात्क्रियमाणनिंदावचनहननादिरूपाव
ह्वविधा दोषास्तान्नद्वैतब्रह्मज्ञानसाधनशुभक
पेण हरतीति कलिदोषहरा ॐ कलिदोषहरा
यै नमः १५ कंजलोचना कंजं ब्रह्माण्डं अयं पूर्व
मपः सृष्ट्वा तासु वीर्यमवासृजत् तदंडमभवद्है
मं सहस्रांशुसमप्रभमिति वचनात् कंजात्मने
ककोटिब्रह्मांडानि लोचनयोर्लोचनकृतवीक्ष
णं यस्याः सा तथा सेयं देवतेक्षत इति श्रुतेः
अथवा केभ्यो जायंत इति कंजानि कंजशब्देना
रविंदनीलोत्पलानि लक्ष्यंते तद्वल्लोचने यस्याः
सा तथा ॐ कंजलोचनायै नमः १६ कम्रविग्रहा
कम्रेति मनोज्ञो गांभीर्यधैर्यमाधुर्यादिबहुगु
णोपेतत्वाद्विग्रहो मूर्तिर्यस्याः सा तथा आन

न्स्वरूपममस्तं यद्विभातीति श्रुतेः आनन्दस्वरूप
त्वाद्वाकश्रविग्रहात्ललितरूपेत्यर्थः ॐ कम्रवि
ग्रहायैनमः १० कर्मादिसाक्षिणी कर्मादि येषां
तानि कर्मादीनि उपासनायोगश्रवणमनननि
दिध्यासनानि तेषां साक्षिणी अर्सं बद्धद्रष्टी सा
क्षी चेत्ताकेवलो निर्गुणश्चेति श्रुतेः अथवा क
र्मादयः साक्षिभूताजीवनिष्ठा स्वदनाश्रयतया
आत्मदर्शनसाधनानि स्वज्यमानजगदुपादानभू
तानि यस्याः सा तथा ॐ कर्मादिसाक्षिण्यै नमः

१८

कारयित्री कारयितृत्वं नाम कर्त्तृत्वात्तापयितृत्वं
जायमानकर्मगोचरक्रात्स्नत्यनिष्टत्वकर्मोद्बोधक
त्वे इदं चालिङ् लोट् प्रत्ययानां नानाधर्मः विधिनि
ष्ठाभावनेत्युच्यते तेषां शब्दात्मकतया जगतां
तथा त्वासम्भवात्तदधिष्ठानचैतन्यरूपतया सर्वे
वेदाय नैकं भवन्तीति श्रुत्या वेदस्यात्मभेदेन स्वप्र
काशकतयार्थप्रकाशनद्वारा प्रमाणविधीना
मपि वेदैकदेशतया प्रेरणारूपत्वात्तदधिष्ठा
नचैतन्यात्मना कारयतीति तथा पयसेवसा

र्कर्मकारयतीतिश्रुतेः ॐ कारयित्र्यै नमः १९ कर्म
फलप्रदा कृतानां कर्मणां कालांतरभाविफलप्र
दाने अदृष्टं कारणमित्यनीश्वरमीमांसकादिमतं
नत्वजडानां स्वल्पारणामदृष्टानां चेतनधर्मकर्मफ
लप्रदाने सामर्थ्यायोगात् कृतानां कर्मणां फला
वश्यभावे कर्माध्यक्ष इति श्रुतेः मयैव विहितान्हि
तानिति स्मृतेश्च परदेवता कर्मफलप्रदा ॐ कर्म
फलप्रदायै नमः २० इति श्रीमत्परमहंसपरिव्राज
काचार्य श्रीमद्गोविंदभगवत्पूज्यपादशिष्य श्रीम
च्छंकरभगवत्पादकृतार्था त्रिशतीनामार्थप्रकाशि
कायां मूलमंत्रप्रथमवर्णनामार्थप्रकाशनं प्रथमं
प्रकरणम् १ ॥ पकाररूपेति पकारो मद्रूपं
यद्वितीयवर्णावयवत्वेनज्ञापकं यस्याः सा तथा
ॐ पकाररूपायै नमः १ ॥ पकान्तरी पकंशु
रवमीश्वरोपाधित्वेन न स्वरूपात्मज्ञानेन वि
नाभक्तिर्नेन यपनीयं तदंरं कूटस्थशब्दवाच्यं
साधा तत्प्रतिबिम्बनिष्ठसर्वज्ञत्वयाथायक
विशेषणत्वेनास्यास्तीत्येकान्तरी ॥

एकमक्षरं सर्वप्रकृतित्वात्परापरब्रह्मप्रतीकतया
तदुपासनया तदुभयप्राप्तिसाधनत्वेन शब्दब्रह्म
रूपत्वलितालक्षकशाब्दः प्रणवोस्याप्यस्तीतिवा
एकोऽखंडचैतन्यरूपः अक्षरोविनाशीयस्मेषवोः
र्थप्रापीरत्वेनअस्याप्यस्तीतिवा एकान्यतराणिमा
याबीजादीति तदुपासनाप्रतीकत्वेनास्याप्यस्तीति
वा अथपराययातदक्षरमधिगम्यते इतिश्रुतेरखं
डाकारब्रह्मप्रतिफलनयोग्यचैतन्यरूपतयातद्वृ
प्राप्तिमात्रेणाक्षरपदलक्ष्यचैतन्यविषयतासंबंधे
नास्याप्यस्तीतिवा एकाक्षरी ॐएकाक्षरायैनमः १
वकारोनिर्गुणब्रह्मणोवासगुणब्रह्मविशेषेण
समुच्चयपरः सर्वचेति द्रष्टव्यं सच्चिन्मयःशिवः
साक्षात्तस्यानंदमयीशिवेति वचनेन स्त्रीरूपात्वि
तयेहदेवीस्वरूपामथर्वेश्वरी अथवा निष्कलंध्या
येत्सच्चिदानन्दविग्रहमिति स्मरणाच तंसीतंउ
मानितिश्वेताश्वतरोपनिषदुपाधिकृतनानारूप
संभवोमेध्य अतएवक्तेयंदेवतैकत्वेसादौ तत्स
त्वसमाप्तेरत्यंतेक्षतस्त्रीलिंगदेवादिपदानांतत

त्रि

सत्यमिति नपुंसकांतस्यात्मेति पुंल्लिंगांतशब्
स्यैकार्थत्वं श्रीभाष्यकारः अविविक्तितोपाधिसं
तयातत्त्वंपरत्वस्यार्थस्यैकत्वात्मतिपादयांबभूः
तस्मात्सर्वपदत्वस्यार्थेसर्वे अपिगुणावर्णितेसं
भविष्यन्तीति हयग्रीवेणास्याविंशत्यांवहत्वस्य
काराऽपात्तास्तेनवयंसर्वेषांसर्वज्ञानपार्थकेनप्र
योजनानंतरंपश्यामः एकानेकाक्षराकृतिः प
कमीस्थरेप्रतिबिम्बोपाधितयाशुद्धसत्वप्रधान
मक्षरमक्षानमनेकानिमलिनसत्वप्रधानतयाजी
वोपाधिभूतान्यक्षराणिअज्ञानानि मायावावि
द्याचभवतीतिश्रुतेः एकंचानेकानिच एकानेका
नि एकानेकानिचतान्यक्षराणिचतानितया
मायांचप्रकृतिंविद्यादित्यादिश्रुतेः तेचाकृत
यःप्रतिबिम्बानि अविच्छिन्नानिचैतन्यानिवा य
द्वसोदकावच्छिन्नप्रतिबिंबाकाशावयस्याःसात
था अथवा एकानिचअगावायानि अनेकानि
च अकारादिक्षकारांतानि अक्षराणिवर्णाश्च
कृतिस्वरूपंयस्याःसा मातृकास्वरूपंतेनवा

अकारादिक्षकारान्ता मातृकात्वभिधीयते इति वचना
त्‌ अथवा एकं च एकान्तरौ तौ च इतराण्यनेकान्त
राणि च सर्वे मिलित्वा पञ्चदशवर्णात्मिका मूलवि
द्याकृतिः स्वरूपं यस्याः सा एकीभूतानेकान्तरेषु
अनेकरूपान्तेषु आकृतिः स्वरूपं शोधितत्वंपदार्थसा
मरस्यात्मकं यस्याः सा ॐ एकानेकान्तराकृतये ।
एतन्नदित्यनिर्देश्यया एतदेतत्कालेइयत्तया परिच्छे
दवद्वस्तु तत्परोक्षनिश्चितस्वरूपं एतच्चैतच्च एतन्न
दीप्रकारः इत्थंभावे तृतीयार्थे तथा च सततवतत्वा
भ्यामित्यर्थः एतन्नदित्यनेन निर्देष्टुं निर्वक्तुं योग्या
मानभवतीत्यनिर्देश्यया लोके सविशेषणो हि पदा
र्थः एतत्त्वा एतत्त्वादिना यद्धर्मविशेषेण तद्रू
पेण निर्वक्तुं शक्यः शब्दप्रवृत्तिनिमित्तजातिगुण
क्रियादीनामेकस्य संबन्धो नास्ति अशब्दमस्पर्श
मरूपमव्ययं निर्गुणं निष्क्रियं निष्कलमित्यादिश्रु
त्या तादृक्तकेन करणेन वाचकेन निर्देष्टुमश
क्यं यद्वाचानभ्युदितमिति श्रुतेः अत एवानिर्दे
श्यनिर्देश्यया वाङ्मनसातीतेत्यर्थः अथवा एतत्प

त्रि
८
8

त्तादिप्रमाणसिद्धंकार्यंयस्मादिपरोक्षादिविशिष्टं
पूर्वकालसम्बन्धिव्यवहितंकारणमुच्यते इतिशाब्द
उभयमसम्बन्धनीयः कार्यमिति कारणमित्यपिशु
द्धचैतन्यस्वरूपानिर्देश्यकार्यत्वकारणत्वद्वंदकोपा
धिविरहितत्वेनकार्यकारणभावाभावे तद्वाचक
शब्दैः विषयीकर्तुमशक्यत्वात् अथवा यत्तदपरो
क्षतया अहमिति प्रतीयमानंजीवचैतन्यंत्वंपदवा
च्यार्थः यत्परोक्षतयाप्रतीयमानमीश्वरचैतन्यं
तत्पदवाच्यार्थ इतिशाब्दएवचकारार्थः तथाच
वादिभेदसिद्धांतमत्रदर्शितः सांख्यमते प्रकृतिः
जगत्कर्त्रीपुरुषोजीवः नानाचेतनाभोक्तानित्य
ईश्वर एवनास्तीत्यंगीकृतं भगवतः मते गुणिसं
वेविद इतिश्रुतेः नित्यगुणविशिष्टात्परमेश्वरा
द्विषोर्जीवानामुत्पत्तिविनाशवत्वेनानित्यत्वात्
सएवभगवान्पारमार्थिकः एकइत्यंगीकृतः तदुभ
यवादिमतसिद्धांतस्योपनिषदसूत्रकारभाष्यका
राभ्यांनिरस्तत्वात्तदुभयविषयाप्रनिर्देश्यपारमा
र्थिकसच्चिदानन्दरूपतयाछांदोग्यमतदेवताशाह्यार्थस

प्रतिष्ठापनादितिभावः अथवा तदस्येश्वरादि
कारणादादिसिद्धन्ततद्यवस्थितभेदवर्जीवेश्वरह्
पतया प्रनिर्देशपाभेदव्यवस्थायायपवमाधितम
शाक्यत्वादित्येतत् तदित्यनिर्देशपा ॐपतन्नदिति
निर्देशपायैनमः ४ पकानन्दाचिदाकृतिः पको
ऽद्वयः अद्वतद्रूपत्वेनअभीप्सितआनंदः स्वसंवि
त्प्रेतमयप्रकाशोत्तानं आनन्दआसौचिञ्चआनंदश्चि
त् पकाचासौआनन्दचिञ्च पकानन्दचिञ्चसैवा
कृतिःस्वरूपंयस्याःसा सच्चिदानंद ब्रह्मस्वरूप
लक्षणवतीत्यर्थः विज्ञानमानन्दंब्रह्म आनंदो
ब्रह्मेतिव्याजनात् शीघ्रस्वरूपप्रकाशात्मकपर
मानंदस्वरूपस्य जीवन्मुक्तिवस्थायांपरमात्मज्ञा
नवस्तुरूपानुरूपप्रत्यक्षप्रमाणगम्यत्वमप्यस्ती
ति सातथा अथवा पकेषामनुभावकानांयोगी
नामानंदसाक्षात्काररूपाकृतिनिरावरणप्रकाश
रूपायस्याःसा अथवा आनंदःशिवस्थितपरमेश्व
रपकंभूतेपकरहिते आनंदचिन्नावाकृतिर्यस्या
सातथा ॐपकानन्दचिदाकृतयेनमः ५ ॥

नन्वानंदस्य लक्षणपरा आनंदमयो वाच्यः तथा चै
कोज्ञानवानीशानईशिनीभिरिति श्रुत्यैकैकत्वम
पिनीवेसिद्धमिति तथा प्रकाशस्यानन्दस्य तस्यावि
द्याधिष्ठानप्रकाशकचैतन्यं आकृतिर्यस्यासेति वि
ग्रहः संभवति ब्रह्मपुच्छंप्रतिष्ठेति तत्प्रकाशकचै
तन्यस्य पुच्छशब्देन परामर्शात् एवं च सेतिप्रकाश
कनित्यत्वस्य प्रकाश्यनित्यत्वापेक्षितत्वात् सत्यंज्ञा
नमनंतं ब्रह्मेत्यादि ब्रह्मस्वरूपलक्षणवाक्येप्यवा
च्यार्थप्रधानेन विधिमुखेनैव च ब्रह्मप्रतिपादने अ
तद्व्यावृत्तिरूपनिषेधमुखेन लक्षणार्थप्राधान्ये
न ब्रह्मस्वरूपलक्षणप्रतिपादनायोगे तत्त्वमसि
वाक्येपि वैशिष्ट्यं संभवतीति चेन्नेत्याह एवमिता
गमाबोध्येति एवं विशिष्टतया प्रसक्तसिद्धत्वेन
आगमैर्वेदैर्ज्ञापनीया न भवति आनन्दशब्दस्यानं
दवाचकस्य तत्परत्वे संभावितेषद्दुःखनीवलक्ष
णयाजयदोषापात् पारमार्थिकभिन्नसत्ताकवस्त्व
तराभावेन तत्त्वंपदवाच्यार्थनिष्ठविशेषणाद्वय
स्यान्योन्यविरोधवत्तयातमः ॥

प्रकाशवद्देशिकाम्नायोगेऽप्यखंडार्थो वाक्यार्थः सं
पद्यते तथा च स्वरूपलक्षणवाक्येष्ववाच्यार्थस्य
अतोन्यदार्तमिति श्रुत्या मिथ्यात्वप्रतिपादना
त् निषेधमुखेनैव अतद्व्यावृत्तिस्वरूपे प्रतिपा
दनेन लक्षणवाक्यानि समंजसानीति भावः
गें एवमित्यागमावोध्यायै नमः ९ एकभक्ति
मदर्चिता एकस्मिन्नभेदे जीवब्रह्मणो भक्ति
भजनीयत्वबुद्धिस्तत्परिजिज्ञासा येषामस्ति
तैरर्चिता पूजिते तत्स्वरूपलक्षण स्तुताध्यातान
मस्कृतेत्येवमादीनां यन्मनसाध्यायत्वबुद्धिस्तत्परिजि
ज्ञासा येषामस्ति तैरर्चिता पूजिते तत्स्वरूपलक्षण स्तु·
ताध्याता नमस्कृतेत्येवमादीनां यन्मनसाध्यायति
तद्वाचा वदति तत्कर्मणा करोतीति श्रुतेः मानसि
कव्यापारपूर्विकान्येत्येतदिंद्रियकर्माणि भव
न्तीत्यभिप्रायः अथवा अस्मिन्संसारमंडले तत्स्व
रूपपरिज्ञातारो ये केचन तेषां भजनीयत्वध्यव
सायो भक्तिस्तदेकप्रवणा ता सगुणब्रह्मविषया
द्विविधा तैरेकभक्तिसद्भिरर्चिता अन्तर्यागमहा

त्रि
वि
९

योगप्रकारैः सुजितेत्यर्थः ॐ एकभक्तिमदर्चिता
येनमः २ एकाग्रचित्तनिर्ध्याता एकमेकस्वरूपं
अप्रमालंबनं विषयो विजातीयप्रत्ययतिरस्कार
पूर्वकसजातीयस्मृतिकाभिर्निरन्तरव्याप्तिविष
यीकृतं चैतन्यं यस्य तत्तादृशं चित्तमंतःकरणं
येषां तैर्यमनियमासनप्राणायामप्रत्याहारध्या
नधारणासमाधीनां परिपाकातिशयं पश्चात्सं
पाद्यमानासंप्रज्ञातसमाधेः त्रिविधभूमिकाऋतं
भराप्रज्ञालोकाप्रशांतवाहिताचेति ऋतं यथाभू
तं सच्चिदानंदलक्षणं ब्रह्मभवति ऋद्धिव्याप्या
विषयीकरोति इति प्रथमा तया आत्मन्येव वशं
नयेदिति भगवद्वचनात् प्रज्ञालोका प्रज्ञाया
मंविडकारवृत्तौ नित्यनिरंतराभ्यासेन परिपाक
स्थिता ब्रह्मविषयिणां आवरणाभिभवं कुर्वं
त्यां सत्यां प्रज्ञाप्रतिष्ठत्यादिश्रुतेः प्रज्ञाया ब्रह्म
रूपायाः आलोकः अभिव्यक्तिः साक्षात्कारः यस्यां
संपद्यते सा कारणविज्ञानं यस्मिन्विज्ञाते सर्वमि
दं विज्ञातं भवतीति एकविज्ञानेन सर्वविज्ञानरूपं

प्रारब्धवशान्न याचितं तदध्यस्तं सर्वं जगद्द्रष्टुमिच्छ
ति यदि तदानीं चैतन्यप्रकाशेनैव प्रकाशितं ज
गत्स्वप्नपदार्थवदशेषं भासते इदं च भरद्वाजाना
मस्तीति पुराणादिप्रमाणावेद्यमस्माकं तथा च
तस्यां भूमिकायां निरुध्यसामर्थ्यसदन्तःकरणं
साकारस्वरूपं निर्वासनं यदा न श्यति तदा प्रशा
न्तवाहिता भवति वाहः प्रवाहः संततवृत्तिधारा
अस्यास्तीति वाही वाहितो भावो वाहिता प्रशा
न्ता चासौ वाहिता च प्रशान्तवाहिता अथवा प्रशा
न्तो वाहोऽस्यास्तीति प्रशान्तवाही तस्य भावः
प्रशान्तवाहिता मनसो वृत्तिशून्यस्य ब्रह्माकारत
या स्थितिः असंप्रज्ञातनामेति समाधिर्योगिनां
प्रियः इति वचनात् प्रशान्तमनसं ह्येनमिति
भगवद्वचनात् च पृथिव्यप्तेजोऽनिलखे समुत्थ
िते पञ्चात्मके योगगुणे प्रवृत्ते न तस्य रोगो न
जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरमिति श्रु
त्सकलत्तरणः साधनपरिपाकवशाद्भवतीति तैः
निध्यातृध्यानस्य निर्वर्तनात् भेदास्फूर्तेः

ध्यानविषया न भवतीति ध्यातः स्वरूपेण प्रकाशा
ते ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेः निर्ध्यानेति पाठे
नितरां श्रवणमननाभ्यासध्यानेन साक्षात्कृतेत्य
र्थः ॐ एकाग्रचित्तनिर्ध्यातायै नमः ७ एषणा
रहितादृता एषणा इच्छा सा त्रिविधा एतल्लो
कजयाय पुत्रैषणा पुत्रलोकजयसाधनकर्म
संपादनाय वित्तैषणा उपासनादिना जयसाध
नो देवलोकस्तस्मिन्नेषणा लोकैषणा आभी र
हितैरनाकृष्टचित्तैः नैव सा पुत्रैषणायाश्च वित्तै
षणायाश्च लोकैषणायाश्च भिक्षाचर्यं चरन्ती
ति श्रुतेः एषणारहिताः परमहंसपरिव्राजकाः
संन्यासिनस्तैरादरेणातिशयप्रेम्णा स्वस्वरू
पेणादृता अंगीकृता निरंतरध्यानेन साक्षात्कृ
तास्तीमा तद्रूपतया भासमानेत्यर्थः ॐ एषणारहि
तादृतायै नमः ८ एलासुगंधिचिकुरा एलादि
वदितिदृष्टान्तप्रदर्शनेन सौगन्ध्यमात्रसद्भावप्रदर्श
नेन प्राकल्पितदिव्यपरिमलसद्भावहेतुः नतु
प्राकृततत्त्वप्रदर्शनपरं परब्रह्मणः स्वाधीन

साधनत्वात् तद्दत्सुगन्य इति सामान्यमात्रेव्यज्य
ते गुणमात्रादानेन सर्वत्रपदार्थांतरस्पष्टदृष्टांती
करणात्सुगंधा येषांतानि सुगन्धिनस्तादृशा
श्चिकुराः कुंतला यस्याः सा तथा स्वभावसिद्धदि
व्यपरिमलशालि सर्वांगसौंदर्यवतीविरजप
दस्योपलक्षणादितिभावः ॐ पक्ला सुगन्धिचि
कुरायैनमः १० एनःकूटविनाशिनी एनसां
पापानां कूटंसमुदाय आगामिसंचितप्रारब्ध
भेदेन समष्टिरूपेणाद्धृतं तत्त्वज्ञानेनविना
अन्यस्यभोगमात्रस्य तद्विनाशकत्वावगमात्
तेषांचकल्पकोटिकालंक्रिमिकभोगप्रथावं
विनोपायांतरेण तदेषुनात्मब्रह्माभेद
ज्ञानविषयतया चैतन्यं तन्नाशयतीति तथा
एवंविधं पापकर्मनक्षिप्यते नाशरीरस्यप्रिया
प्रियेस्पृशत इत्यादिश्रुतेः अहंत्वासर्वपापेभ्यो
मोक्षयिष्यामीति स्मृतेश्च अथवा एनांसिवत
त्कारणीभूतं कूटैकपदवेचनाभिधानंच तत्का
रणंमायांच नाशयतीति तथा ॐ एनःकूटवि

त्रि वि १२ 12

नाशिन्यै नमः ॥ ११ एकभोगा एकेन कामेश्वरेण
साकं भोगो भुक्तिर्भोगः स्वस्वरूपानन्दानुभवो यस्याः
सा तथा अथवा एकस्मात्तानतत्कार्यस्य कार्यका
रणरूपेणाभिन्नस्य तदधिष्ठानतया स्वसत्ताया
एकत्वेन भोगः परिपालनं यस्याः सा अयं चोत्त
निष्पितिनाबाह्येतमायोपाधिकचैतन्यमित्यर्थः
एकाकी न रमते ततः पतिश्च पत्नी साभवदिति
पुरुषविधब्राह्मणवचनाद्दंपत्योरैहिकभोगव
त्त्वावगमेन परमार्थत एतत्स्वरूपस्यैकचैतन्यरूप
तावगमात् तदुभयभोगस्याप्येकभोगत्वानन्द
दितिवा ॐ एकभोगायै नमः १२ एकरसा एको
भिन्नो रसः सामरस्यं यस्याः सा रसं ह्येवायं ल
ब्ध्वानन्दी भवतीति श्रुतेः अथवा एको नवरसे
षु मुख्यः शृंगारो रसः यस्याः सा तथा एकस्मि
न्स्वभर्तरि रसो निरतिशयप्रीतिरनुरागसंज्ञा य
स्याः सा तथा एकेन परमेश्वरेणास्यां क्रियमाणा
प्रीत्यतिशयरूप एतद्विषयको रसो यस्याः सा
अथवा षड्रसेषु मुख्यो मधुररसः प्रियत्वेन य

स्याः सा तथा सत्त्वगुणप्रधानमायोपाधिकचैत
न्यरूपत्वात् तस्याः स्निग्धाः स्थिराहृद्या आहाराः
सात्त्विकप्रिया इति श्रीभगवद्वचनात् ऐं एकर
मायै नमः १२ एकैश्वर्यप्रदायिनी ईशाते प्रेरयत्य
न्तर्यामित्वेन सर्वाणीतीश्वरः स सर्वेषु भूतेषु ति
ष्ठन्सर्वाणि भूतान्यन्तरो यमयतीति श्रुतेः तस्यै
श्वर्यं मारणानां जीवानां भूतशब्दवाच्यानामज्ञानका
र्यातिकारणे पतितप्रतिबिंबचैतन्यरूपाणां
जाग्रदाद्यवस्थाभिमानानामखण्डब्रह्मसाक्षात्कारवे
लायामभेदानुभवात्तत्त्वमसीत्यादिश्रुतेश्च एक
मेवाद्वितीयमिति विशेषितत्वाच्च एकश्चासा
वीश्वरश्चेत्येकेश्वरस्तस्य भावस्तदैक्यं तत्प्रददा
तीति तथा वहुविधायतनवत्सु सर्वैश्वर्यको विधा
यतनवानित्येके तत्तत्यजननिष्ठविधायादावेतद
तिशायमीतीति वदेकं च निरतिशयमणिमादि
रूपमैश्वर्यं निःश्रेयसं ददातीति यद्वा एकं मा
नुषं सर्वोत्कृष्टं सार्वभौमत्वादिलक्षणं अभ्यु
दयसामान्यमैश्वर्यं प्रददातीति वा तथा ॥

त्रि १६ 13

गंएकैश्वर्यप्रदायिन्यैनमः १४ एकातपत्रसा
म्राज्यप्रदा आतपा दासमंतादाध्यात्मिकाधि
दैविकाधिभौतिकानि आशाद्यर्थः तेभ्योजा
तास्तथाआतपा तपंतिशोषयंतीति तपा
आतपेभ्यस्त्रायतीतिरक्षतीति आतपत्रं स
र्वसंमादः दुःखोपशामकमात्मज्ञानं यज्ज्ञा
त्वानपुनर्मोहमेवंयास्यसिपांडवेति भगवद्व
चनात आविलदुःखनिदानाज्ञाननिवर्तक
मेकंलक्षणाया अभिन्नब्रह्मविषयकात्मेत्य
र्थः एकंच तदातपत्रंच अखंडाकारज्ञानंते
नजायमानंयत्साम्राज्यंसाम्राज्यराज्ञिभवं स
र्वोत्तमत्वंतत्प्रददातीतितथा यद्वा एकात
पत्रंसाम्राज्यंचक्रवर्तित्वंतत्प्रददातीतिवा
गंएकातपत्रसाम्राज्यप्रदायैनमः १५ ए
कांतमूर्जिता एकस्याद्वितीयस्यशोधित
तत्वपदार्थस्यांते उपाधेहृदिपरिच्छेद
कत्वात्पूजिताहमित्यपरोक्षीकृता यस्मा
तादपरोक्षोदात्मेति श्रुतेः अथवा एकस्यब्रह्मणार

एकांतपूजितेयं पूजिता षड्दलविशरणागत्यवसा
दनेक्षितितयात्तपाठात्तुपनिषद्भस्ममाशपरतयाप
र्यवस्यतीत्यर्थः एकांतपूजितेति आउपनिषदि
त्यर्थः अथवा एकांतेगुह्यानिवार्ताश्रयणेप्रयोज
येदिति श्रुतेः एकांतस्थले ध्यानादिनायोगि
भिर्विषयीकृतेत्यर्थः अथवा कामेश्वरेण एकां
तेस्त्रीलिंगेसंप्रदायप्रवृत्त्यर्थमादावीश्वरेण ब
हिर्यागक्रमेणभावादिसाधनेन सर्गादिकालेपू
जादिनासंतोषितेतितद्भृतार्थव्यपदेशः एकांते
सर्वप्रविलापनसमयेपूजिताध्यानादिनासंपादि
तासाक्षात्कृतेत्यर्थः कश्चिद्धीरःप्रत्यगात्मानमैक्ष
दावृत्तचक्षुरमृतत्वमिच्छन्निति श्रुतेरिति वा ॥
ॐ एकांतपूजितायैनमः ९ एधमानप्रभा एध
मानाविवर्धमानासर्वातिशायिनी प्रभा कांतिः
प्रकाशो यस्याः सा तमेव भांतमनुभाति सर्वं तस्य
भासा सर्वमिदं विभाति इतिश्रुतेः ॐ एधमानप्र
भायैनमः १० एजदनेकजगदीश्वरी एजंति कंप
मानानि चेष्टमानानि प्राणवंति अनेकानिना

त्रि
१४
14

नोपाधिकानि जंगमानि विचरणशीलानि
इत्यर्थः ईष्टे प्रेरयतीतीश्वरी स्थावराणां तु स्वतः
स्वस्थानपरिहारेणापायानभिज्ञत्वेऽपि स्वजीवन
हेतुभूतोदकपानादिप्रवृत्तिदर्शनाच्चेष्टावत्त्वं
तत्राप्यस्तीति जगच्छब्दोऽनिर्विशेषप्रपंचमात्र
परोव्यक्तस्य अन्यथा सर्वेषु भूतेष्विति श्रुतौ
चरप्राणिमात्रपरत्वं संकोचापत्तेः असति वि
रोधे सामान्यवाचकस्य शब्दस्य विशेषपरत्व
त्वांगीकारस्यान्यायात् अन्यथा ब्रह्मणः प्रपं
चमात्रोत्पत्त्यादिहेतुत्वं संज्ञितं भवदत्तेन
एवारद एतज्जगत्पदमुपात्तं यथा कायक्रि
याश्रयत्वेन प्रमाणवत्त्वमात्रस्य समाहितहि
रण्यगर्भाश्रयत्वेन सर्वेषामैश्वर्यं संभवतीति भा
वः ॐ एतदनेकजगदीश्वर्यै नमः ८ एकवी
रादिसंसेव्या एको निरसाधारणो वीरः पुर
श्चर्यादिनाहूतमंत्रदेवतासाक्षात्कारः लब्धपु
रुषार्थः उमात्रिजयप्रभास्वुदयशाली राजरा
जनिष्ठधैर्यगांभीर्यादिगुणवत्त्वेन तत्तद्देवतो
पासकाः पुरुषादयो वीरा इत्युच्यंते।

तेषांसांप्रतीनां तादृशयोयेषांप्राणिकोटीनां
तेएकवीरादयस्तासांकदंबैः संसेव्यासेवितैयोग्या
यदेश्वरीभक्तानुग्रहदक्षाणाति सगुणनिर्गुणविग्रह
वतीस्थानतदानेकपरिवारदेवतापरिसेवितामन्त्रदे
वताक्तेनोपासनीयेत्यर्थः अथवा एकवीरादेराउका
स्तेरादयः शक्तयः यणामलाप्रमुखास्ताभिस्ताः कि
लअपंचेखलपीठेस्थितः सत्यउपासकानामभीष्ट
वरप्रदाथ्योहश्यंते तास्रस्याः परसेवकत्वेनस्व
यमभीष्टवरप्रदाथ्योहश्यन्ते तास्रस्याःपरसेवक
त्वेनस्वयमभीष्टवरकामयिष्यइत्यस्याःप्रकृतायाम
हिमातिशयोक्तिः ॐएकवीरादिसंसेव्यायैनमः
एकप्रभावशालिनीप्रभोर्भावःप्राभवं ह्तकत्वमेकं
प्रतितरसाधारणंचतत्प्रभावंचतच्छालतइतित
था अथवाप्राभवनस्यसापेक्षिकधर्मत्वादेकप
दस्यवानन्यगामित्वार्थस्यसामानाधिकरणेनसा
रस्येनपर्यालोचमानेनायमर्थः सूच्यते प्राभवंच
नियमस लोकोऽङ्गंविना अनुपपद्यमानंतदंतर्गतं
तत्कार्यमप्यापत्याक्षिपति तथाच वटवीजवत्सवा
तर्गतपश्चाद्धाविकार्यवत्कृदस्थचैतन्यमितिभावः

त्रि·
१५
15

अथवा आभवं नामैश्वरत्वं तदास्तिमस्ति यमसृजन
वोपलक्षणविषया यस्यैकस्याखंडचैतन्यस्यतदे
कप्रभावं पादोस्य सर्वा भूतानि एकांशेनस्थि·
तो जगदिति श्रुतिस्मृतिभ्यां भूतसर्वगत्याआ
भवोपलक्षितं एकं सच्चिद्घनैकरूपं शालते
आविःकरोति तथा अथवा एकं च तत्साभवं
च एकमाभवं मुख्यं सार्वभौमत्वमिति यावत्
प्रभुत्वपरंपरायाः सविशेषायाः कचित्पर्य
वसानावश्यंभावेनेति एष सर्वेश्वर एष भूता
धिपति एष भूतपालयति श्रुत्यंतर्यामितया
साक्षात्कस्युत्पादकत्वरूपप्रेरकत्वेनरवागा
घवयवप्रेरणातिशयानापर्याप्तिरस्येवास्ती
ति अभिप्रायः तथा च निरंकुशस्वतंत्रजगत्
कारणत्वरूपतटस्थलक्षणलक्षितवेदांत
समन्वयविषयीभूताखंडसच्चिदानंदस्वरूपा
परदेवता अवशांशस्वस्वरूपेणैव ध्यातव्येति निष्कृ
ष्टार्थः गंएकआभावशालिन्येनमः २· इतिवि
शालीनामार्थप्रकाशिकायां मूलमंत्रद्वितीयवर्णः· २

ईकाररूपा ईकारो रूपं स्वरूपं तत्तीयावयवो यस्याश्चक्र-
मंत्रस्य यस्याः सा तथा ॥ ॥ ईकाररूपायै ॥ १ ॥ ईशि-
नी ईष्टे इतीशिनी सर्वप्रेरकेत्यर्थः ॥ ॥ ईशित्रे ॥
ईप्सितार्थप्रदायिनी अर्थ्यते प्रार्थ्यते इत्यर्थाः प्र-
भ्युदयनिःश्रेयसरूपा आत्मं गतं प्राप्तुमिच्छा वि-
षयभूता ईप्सिताः ते च ते अर्थाश्चेति कर्मधारयः
ईप्सितानर्थान्प्रददातीति तथा केवलकर्मणा-
मदृष्टद्वाराकालांतरभाविफलतादृशात्वमचेतन-
त्वान्नोपपद्यते तादृशानां कस्मिन्नप्यर्थे साम-
र्थ्यादर्शनाच्चेतनाधिष्ठितानां तु कर्मणां भृत्य-
कृतपराक्रमादि दृष्टराजावनदाराधितपरमेश्व-
रः कर्माध्यक्ष इति कृत्वा सर्वज्ञस्य तत्तदधिका-
रीकृत पुण्यापुण्यानुरूपतया फलविषयके
क्षेत्रात् दनेन तत्साधनानुष्ठापयितारसन् तत्तत्
फलकामान्स्वयितेति अनीश्वरमीमांसकमत-
निराशोद्देश्यः अथवा ईप्सिता जिज्ञासितेत्यर्थः
तथा च स्वस्वरूपप्रतिपादकवेदांतश्रवणमनननि-
दिध्यासनविषयीकृता सती अर्थ्यं प्रार्थ्यमानं सर्वा-
भ्यर्हितं मोक्षरूपं पुरुषार्थं प्रददातीति तथा

त्रि
१६
16

मोंईशसितार्थप्रदायैनमः ३ ईहगित्यविनिर्देश्याय
ईदृगेतन्नूतनलक्षितपताहृशपरिमाणपर्वस्व
रूपपताहृशाथमेवानिति प्रत्यक्षसिद्धोनिर्देष्टुंश
क्यते यत्त्वत्त्वषानपश्यतीतिश्रुत्यासर्वेन्द्रियगोच
रत्वनिराकरणाद्धिनिर्देश्यानभवति ओपनिषद्ा
नामते उपनिषद्ावेदैकदेशात्वेनेतरप्रमाणानपे
क्षतयाऽज्ञातार्थज्ञापकत्वेनप्रामाण्यमुररीकृते
इदमेताहगिति प्रत्यक्षसिद्धार्थज्ञापनेनतासामनु
वादकत्वेनसापेक्षत्वरूपमप्रमाण्यंप्रसज्यते इत्यः
भिप्रायः ओंईहगित्यविनिर्देश्यायैनमः ४ ईश्वरत्व
विधायिनी ईश्वरस्यभावस्तत्वंविदधाति आवरण
विक्षेपशक्तिमदज्ञाननिहृत्ताखंडाकारचैतन्यरू
पासती भेदबुद्धिमात्रसंपादितेश्वरैक्यायोगभ्रमं
निवर्तनइत्यर्थः स्वनरूपेणाविनिष्पद्यतइतिश्रु
तेः अथवा ईश्वरत्वंनामनानादेशविधायनेतकर्षा
दिसत्वंतन्नत्याणिकायप्रएयप्रारब्धानुसारेणक
र्मफलंप्रयच्छतीतिवा ओंईश्वरतत्त्वविधायिन्यै
ईशानादिब्रह्ममयी ईशानतत्पुरुषअघोरसघो

५

नातवामदेवाख्यानिपंचब्रह्माणि तानिमयःस्व
रूपमस्याअस्तीतिवा तथा अथवा ईशान
आदियेषांते तथाअधिकारपुरुषा विष्णुब्रह्मे
न्द्रादयस्तेषामपि तत्तन्नामरूपविशिष्टा अंतर्बु
द्धिमतामपि अंतर्यामिस्वरूपेणाबुद्धिप्रेरकसच्चि
दानन्दस्वरूपपरब्रह्मानन्दप्रकाशात्मनास्फुरती
ति तथा ॐ ईशानादिब्रह्ममय्येनमः ६ ईशि
त्वाद्यष्टसिद्धिदा ईशित्वमादिर्यासांतथा अणि
मामहिमालघिमागरिमाप्राप्तीशित्वंप्राकाम्यं
चवशित्वंचयत्रकामाः परांगताइतिवचनात्सिद्
योष्टौतादत्तातीतितथा अणिमातत्त्वमात्रेणा
ति सूक्ष्मभावोलाघवंवा गरिमागुरोर्भावाज
डतापर्वतादिवत् भारवशेनाप्रकम्पितत्वमि
त्यर्थः महिमामहतोभावोमहिमा तत्त्वमा
त्रेणविराडाकृतिमहत्वं प्राप्तिहस्तेनचन्द्रमंड
लादिस्पर्शईशिता इंद्रादीनामपिप्रेरकता
प्राकाम्यमप्रतिहत कामनावत्वंवांछितार्थ
फलप्राप्तिरित्यर्थः वशित्वंसर्वलोकवशक

त्रि

१०

रणसामर्थ्यं यत्र कामाः परांगताः काम्यंत इति
कामा विषया यत्र यस्मिन्नैश्वर्ये सति परांगता ब
हिर्मूर्ता भवंति विषयाणामनुभवाभावेपि त
जन्यसुखवत्त्वमवाप्तकामत्वमिति यावत् प
ताश्चाष्टौ सिद्धयः ॥ ईशित्वाद्यष्टसिद्धिदायै॰ ७
ईशित्री उदासीनश्चासौ साक्षिणी असंगोदासी
नज्ञानस्वरूपेत्यर्थः साक्षी चेति श्रुतेः आवि
रपि निहितं गुहायामित्यादि श्रुतेः ॥ ईक्षित्र्यै॰ ८
ईक्षणस्रष्टांडकोटिः ॥ अण्डानां ब्रह्मांडानां
कोटयो संख्यातानि भूतभाविकालभेदेन ब
हुवचनं कोटिशाहस्यानादित्वात्संसारमंड
लस्य ईक्षणेन भाविकार्यालोचनेन स्रष्टाण्ड
कोटयो यासां ताः तदानन्देक्षत बहु स्यां प्रजा
येयेति स ईक्षांचक्रे आत्मा वा इदमेक एवाग्र
एवासीत् स ऐक्षत लोकान्नुसृजा इत्यादि
श्रुतेः बाह्यकरणमनपेक्षणेनाभ्यादिदृष्टा
न प्रदर्शनेन चेतनस्याभिन्ननिमित्तोपादानप्र
दर्शनमुक्तमिति भावः ॥ ईक्षणस्रष्टांडकोटये॰ ९
ईश्वरवल्लभा ईश्वरः कामेश्वरो वल्लभः पतिः

यस्याः सा तथा ईश्वराणां ब्रह्मविष्णुरुद्रादीनां
गणनिष्ठमहिमोत्कर्षरूपेण प्रीत्यतिशयविष
यत्वेनाभ्यर्हिता इत्यर्थः ॐ ईश्वरवल्लभायै नमः

१०

ईडिता ईडस्तुताविति धातुपाठात् स्तुतिभि
विषयीकृता वेदान्तैरिति शेषः एषा नित्यो महि
मा ब्राह्मणस्येत्यादिश्रुतेः ॐ ईडितायै नमः ११
ईश्वरार्धांगशरीरा ईश्वरस्य सच्चिदानन्दात्मकस्य
शिवस्यार्धं च तदंगं वार्धांगं आनन्दस्वरूपता शरी
रं शरीरवत्स्वरूपलक्षणं यस्याः सा तथा सच्चि
न्मयः शिवः स्यात्तस्यानन्दमयी शिवेति श्रुतेः अथ
वा ईश्वरस्यार्धांगं वामभागः शरीरमूर्तिर्यस्याः
सा तथा ॐ ईश्वरार्धांगशरीरायै नमः १२ ईशा
धिदेवता ईशस्येत्युपलक्षणं जीवस्यापि ईश
स्य तत्पदवाच्यार्थस्य मायोपाधिकस्य विशिष्ट
स्यापि उपरि विशेषणद्वय परित्यागेन देवताये
तमाना कूटस्थचिन्मात्रशोधितत्वंपदार्थरूपे
त्यर्थः अथवा ईशः कामेश्वरः अधिको देवता
पूज्यो यस्याः सा तथा परमपतिव्रतेत्यर्थः ॥

त्रि

१८

18

ॐ ईशादिदेवतायै· १३ ईश्वरप्रेरणकरी ईश्वर
स्य विश्वचैतन्यरूपा सती जगत्सर्जनादिकार्ये
प्रेरयित्री प्रेरणकरी आज्ञाधिकेत्यर्थः इच्छाज्ञा
नक्रियाशक्तिरूपावरणविक्षेपशक्तिप्रति
फलितचित्त्वरूपाभाविकार्योत्कृष्टं या
रव्याख्यस्यपरमेश्वरस्येतरणनामधेयप्रकाशात्मि
काभवतीतिभावः ईश्वरप्रेरणं तदाज्ञामन्तरं
णनेनकरोतीति तदीयभार्यात्वेननितरां त
द्गतीतियावत् ॐ ईश्वरप्रेरणकार्यै नमः १४
ईशानताण्डवसाक्षिणी ईशस्यतन्मद्वाच्यस्य
ताण्डवं नर्तनवदप्रयत्नसंपाद्यं लीलामात्रमित्य
र्थः जगत्सर्जनादिरूपा क्रियाचलनरूपकर्म
त्वसामान्यात् धन्यतेतस्य साक्षिणी असंस
र्गप्रकाशरूपेत्यर्थः असंगो न हि सज्जते इति
श्रुते अथवा ईशताण्डवस्य परमेश्वरनर्तना
ख्यभिव्यंजितचतुष्षष्टिकलाजननिरिति प्रदोष
स्तोत्रे ईशताण्डववर्णनमतिस्फुटमिति नेहली
ख्यते ॐ ईशताण्डवसाक्षिण्यै· १५ ईश्वरोत्संगनिलया

ईश्वरस्यस्वभर्तुरुत्संगक्रूते निलयं यस्याः सात
था ॐ ईश्वरोत्संगनिलयायै नमः १६ ईतिबाधा
विनाशिनी ईतिबाधा आधिदैविकाद्युपद्रवः
तद्द्वंद्वं तद्पीडवार्तां नाशयतीति तथा ॐ ईति
बाधाविनाशिन्यै नमः १७ ईहाविरहिता अप्रा
प्तप्राप्तीच्छा ईहा तया विरहिता आप्तकामत्वा
दितीत्यर्थः ॐ ईहाविरहितायै नमः १८ ईश
शक्तिः ईशस्य शक्तिः सर्वज्ञत्वादिरूपा सामर्थ्यं
यस्याः सा तथा देवात्मशक्तिमिति श्रुतेः ॐ ई
शशक्त्यै नमः १९ ईषत्स्मितानना ईषत्स्मितं
मन्दहासो यस्य तत्तथा आननं यस्याः सा तथा
पर्याप्तकामत्वेन सर्वदा प्रसन्नमुखीत्यर्थः दुःखं
स्पर्शिपरमानन्दरूपतया वा तथा ॐ ईषत्स्मि
ताननायै नमः २० इति त्रिशतीनामार्थप्रका
शिकायां तृतीयवर्णार्थप्रकाशनं नाम तृती
यं प्रकरणं ३ लकाररूपा लकारो रूप्यते इति
रूपं मंत्रस्य चतुर्थवर्णत्वेन ज्ञापकं यस्याः सात
था ॐ लकाररूपायै नमः १ ललिता ललितं

त्रि
वि
४८

१९

त्रिपुरसुंदरमिति वचनादत्यंतसौन्दर्यवत्त्वात्त्रि
पुरसुन्दरीत्यर्थः अनुपमसौंदर्या वा ॐ ललि
तायै· २ लक्ष्मीवाणीनिषेविता लक्ष्मी रमास
र्वैश्वर्यशक्तिर्वाणी सरस्वती सर्वज्ञानशक्ति
स्ताभ्यां नितरामकृत्रिमप्रेम्णा अनन्यभूता
सती सेविता सेवा नाम उन्मीलितात्ताप्रतीता
तद्वत्याविसत्यर्थः ॐ लक्ष्मीवाणीनिषेवितायै· ३
लाकिनी कं सुखं कं ब्रह्मेति श्रुतेः तत्र भवती
त्यकं ब्रह्माभिन्नतया प्रतीयमानं दुःखात्मकं ज
गत् अकं लीयते इति लं उपलक्षणमुत्पत्त्या
देः ले अकं अस्या अस्यास्तीति लाकिनी अन्त
तज्जडदुःखरूपजगत्कारणभूता तद्व्याप्ति
स्वरूपं ब्रह्मभूतेत्यर्थः ॐ लाकिन्यै· ४ लल
नारूपा रूप्यते ज्ञायते अनेनेति रूपं तद्व्याप्य
लिंगं चिह्नमिति वा ललनानां स्त्रीणां रूपं वे
षआभरणाद्यलंकारो वा आकृतिर्यस्याः आ
त्यावा ललनास्त्रियो रूपाणि विभूतयो यस्याः
सा लिंगांकितं पद्मपभगांकितं जगदिति पुराण
वचनात् ॐ ललनारूपायै· ५

लसद्दाडिमपाटला दाडिमशब्देन विकसितं तस्य
घ्यं लक्ष्यते लसत्तद्घोविमनप्रकाशं तद्वत् दाडि
मं च रक्तमुपलक्षणं बंधूकादीनां तद्वत्पाटलाश्वे
तिमिश्रितरक्तवर्णप्रधानमूर्तिमतीत्यर्थः श्वे
तरक्तस्तु पाटल इति वचनात् ॐ लसद्दाडिम
पाटलायै नमः ६ ललंतिकालसत्फला ललं
तिकायाः परितो मुक्ताफलखचितनवरत्नमध्य
या ललाटमध्यदेशभूषया इदमुपलक्षणं ल
लाटपट्टादीनां लसत्फलं यस्याः सा तथा ॐ लल
तिकालसत्फलायै नमः ७ ललाटनयनार्चिता
ललाटनयनं येषां ते अत्र ललाटशब्देन भ्रूमध्यं
लक्ष्यते नयनशब्देन ज्ञानमपि तथा चोर्ध्वदृष्टि
भिः खेचरीमुद्राविलीनचित्तै रसीवरणामध्य
देशाभिधानाविमुक्तक्षेत्रे परमेश्वराराधनपर
मपुरुषप्राप्यत्वाभिधायिका अत्र श्रीमज्जा
बालिश्रुतिगतयाज्ञवल्क्योक्तवाक्यनिर्दिष्ट
भूमिका तपसिद्धिमद्रूपैरर्चिता सा तात्कृते
त्यर्थः अथवा तृतीयनेत्रवता शिवेन तत्स्वरूप

त्रि
वि
२०

20

रुद्रैर्वार्चितेत्यर्थः ॐ ललाटनयनार्चितायै
लक्षणोज्ज्वलदिव्याङ्गी दीव्यति प्रकाशत इ
ति दिव्यलक्षणैः स्वरूपतटस्थानामकैरुज्ज्व
लं शोधितं शुद्धं अङ्गं स्वरूपं विग्रहो वा हृतका
ठिन्यन्यायेन तदात्मानं स्वयमकुरुतेति श्रुतेः
सच्चिदानन्दघनीभावात्मको विग्रहो यस्याः सा
तथा अथवा सामुद्रिकशास्त्रोक्तदिव्यलक्ष
णैरुज्ज्वलानि संपूर्णानि दिव्यान्यङ्गान्यवयवाः
शिरःपाण्यादयो यस्याः सन्तीति तथा ॐ लक्ष
णोज्ज्वलदिव्याङ्ग्यै नमः ॥ लक्षकोट्यण्डनायि
का लक्षाणि कोटयश्च असंख्यातान्यपरिमि
तानीत्यर्थः संसारस्यानादित्वेन भूतभविष्य
दादिभेदेन बहुसंख्यावत्त्वमण्डानां तथाविधा
न्यण्डानि च हिरण्यगर्भविराड्रूपाणि समष्टि
यष्ट्यात्मना विश्वतैजसोपाधिभूतानि तेषाम
धिष्ठानविंबचैतन्यात्मना स्वसत्तामापादयती
ति नायिका ॐ लक्षकोट्यण्डनायिकायै ॥ १०॥ लक्ष्या
र्थो लक्षणया शोधनया जहदजहल्लक्षणाया
वाप्रतिपाद्यवेदान्तमहावाक्यानां योर्थस्तत्स्वरूपा

८

:

योगशास्त्रप्रसिद्धबहिरन्तरूपयप्रदेशाविशेष॰
रूपभूमिकास्तस्वस्वमनोवांछाविषयदेशेस्वगुण
त्वेननिर्गुणत्वेनवामनोविलयरूपहठयोगराज
योगादिसाधनपरिपाकवशेनसाक्षात्कृतंचेत
न्यंलक्ष्यमित्युच्यते प्रार्थ्यते याच्यतेगुरुंप्रतीत्य
र्थः लक्ष्योयोर्थः सच्चित्स्वरूपपरमानन्दरूपः सो
पिसैवेति तथा ब्रह्मैवेदममृतंपुरस्तात्पश्चाद्ब्र
ह्मदक्षिणतश्चोत्तरेणेतिश्रुतेः गंलक्ष्यार्थाय॰ ॥
लक्षणागम्या लक्षणानामशक्यार्थवाचकस्यप
दस्यान्वयाद्युपपत्तयेतत्सम्बन्धिपदार्थज्ञानहे
तुः शक्यसंबंधादिः पदजन्यपदार्थज्ञानहेतुः
शक्तिरित्युच्यते तस्यवाच्यवाचकत्वसंबंधा
दिभेदत्वानपूर्विकायापरिच्छिन्नसावयवपदा
र्थसंबंधज्ञानहेतुः केवलचिन्मात्रेनिरुपाधि
केवलत्वनिजात्मादीनांलक्षणतावच्छेदकधर्माणा
मभावेलक्षणायापादप्रवृत्त्ययोगात् तयागम्या
गंतुयोग्यंगम्यंतन्नभवतीति अगम्या वेदांतमते
जहदजहल्लक्षणयाविशेषणमात्रपरित्याग

शि
वि
२१

21

स्मान्योन्यतादात्म्यानुपपत्त्या बोधितत्वात्तदर्थे
सावश्यमंगीकर्त्तव्या विशेषज्ञानस्वरूपत्वे
नानित्यतया लक्षणाजन्यत्वात्तदर्थं सा नापेक्ष
ते इति भावः तथा च प्रकृतायाः परदेवतायाः
याः शुद्धचैतन्यमात्रस्वरूपतया स्वयंप्रकाश
त्वेन लक्षणागोचरत्वात् लक्षणागम्येति ना
मयुक्तमिति भावः ॐ लक्षणागम्यायै नमः १२

लब्धकामा लब्धाः काम्यंत इति कामा ऐहिका
मुष्मिकसुखसाधनानि लक्षणया तत्तज्जन्य
सुखानि वा तथाभूताः कामा यया सा तथा
पर्याप्तकामेत्यर्थः पर्याप्तकामस्य कृतात्मन
श्चेवेह सर्वे प्रविलीयंति कामाः इति श्रुतेः
ॐ लब्धकामायै० १३ लतातनुः लता इव लताः
कल्पादिवल्ल्यः सकलपुरुषार्थप्रदत्वेन गति
प्रसिद्धास्ता इव सुकुमारत्वादिधर्मयावान्तनुमू
र्तिर्यस्याः सा तथा ॐ लतातनवे नमः १४ लला
माराजदलिका ललामा कस्तूरीतिलकेन क
स्तूरीपत्रेण वा राजते शोभते विभ्राजते परमशोभि
शालिकं मस्तकं यस्याः सा तथा ॐ ललामाराजदलिकायै० १५

लंबिमुक्तालतार्चिता लंबिन्यो लंबमाना या ग्रथः प्रसृ
ता मुक्तालता हारा मुक्ताफलानि वा यस्याः सा तथा
लंबरत्नखचितसुवर्णगुच्छगुच्छैः सर्वांगेषु प्रले
वमानैः ललाटपर्यंतलंबमानकिरीटप्रथमभा
गललाटपटनासाग्रताटंकाथः कर्णप्रदेशाकं
ठप्रदेशाहृत्स्तवक्षस्थांगदसमानप्रदेशाकूर्पास
पवितः पदाग्रदेशाकटिनिबद्धकांच्यादिषु प्र
लंबमानेत्यर्थः ॐ लंबिमुक्तालतार्चितायै नमः
लंबोदरप्रसूः लंबोदरस्य महागणपतेः प्रसू
र्जननयित्री मातेत्यर्थः लंबोदरं प्रसूयत इति वा
ॐ लंबोदरप्रसवे नमः ९७ लभ्या संसारदृशा
यामात्मावरकांतानेन स्फुटमप्रकाशमानी
श्रवणादिसंस्कृतांतःकरणहृतावरखंडाका
रज्ञाननासिकायां प्रतिफलितस्वरूपेण वि
स्मृतकंठगतकनकभूषणवत्साभिरूपतया
लब्धुं योग्येति तथा ॐ लभ्यायै नमः ९८ लज्जा
ख्या लज्जेत्युपलक्षणं अन्तःकरणधर्माणां
सर्वेषां आख्यातत्त्वेनानुकारवतीत्यर्थः ति

१८

त्रि
वि॰
२२
22

रोथानादिनानरहितासतीवरादिप्रयच्छतीति
लजाप्यैवभवतीतिचोपवर्ण्यते ॐ लज्जाप्यायै॰
लयवर्जिता अविनाशीवाअरे अयमहमात्
छितिधर्मेतिश्रुतेः लयोविनाशस्तेनवर्जि
तायै ॐ लयवर्जितायैनमः २॰ इतिश्रीत्रिश
तीनामार्थप्रकाशिकायामादिमंत्रवर्णाल
कारनामार्थप्रकाशनंनामचतुर्थप्रकरणं
ह्रींकाररूपा ह्रींकारोरूप्यतेनिर्दिश्यते इति
रूपं मन्त्रैकमावयवोयस्याःसा ॐ ह्रींकाररू
पायै॰ १ ह्रींकारनिलया ह्रींमित्यक्षरंनिलयं
गृहवदवच्छेदकंयस्याःसातथा स्त्रीत्ववाचक
त्वारोपितवाच्यतावच्छेदकधर्मावच्छिन्नतादि
संपादनेन गृहवर्तिपुरुषवद्व्यावृत्तिस्वरूप
ज्ञापकंभवति अन्यथानामत्रावाच्यायथे
प्रवृत्तियोगापातादितिभावः ॐ ह्रींकारनि
लयायैनमः २ ह्रींपदप्रियाह्रींमितिपदंप
द्यतेगम्यतेप्राप्यते नेनेतिपदं पद्यतेगम्यते
ज्ञायतेइतिवापदं ह्रींकारस्यमन्त्रावयवत

१९

५

या तद्देवताप्रकाशकत्वेन तस्यां शक्तत्वात् श
क्तं पदमिति लक्षणात् तथा प्रथमव्याख्यान
हकाररेफईकारानुस्वाराणां वर्णानां समष्टि
रूपेण समुदायात्मकत्वाद्वर्णसमुदायः प
दमित्यपि पदलक्षणवत्त्वमस्य घटते पुरश्च
र्यावता देवता साक्षात्कारद्वारा सकलपुरुषा
र्थप्रापकत्वादिति द्वितीयव्याख्याने तथाक्त
तं तस्मिन्प्रियाप्रीतिमतीत्यर्थः ओं ह्रीं पदप्रि
यायै ॥ २ ह्रींकारबीजा ह्रींकार एव बीजं स्व
वाचकमंत्राभागोपपादकं देवतानां यद्बीज
मत्र उच्यते इति वचनात् ह्रींकारस्य माया
प्रकाशकत्वेन वटधानादिवन्निगूढतयाभिव्यं
जकत्वेन कारणतया यथा बीजमित्युच्यते
सत्कार्यवादिनामव्यक्तनामरूपकारणं बी
जमभिव्यक्तिनामरूपात्मकं पश्चाज्ञाविकार्य
मित्यंगीकारः सकलकारणसमवधाने
विशेषनामरूपवत्तया कारणस्याभिव्यक्तिरु
त्पत्तिः तथा चोक्तं बीजस्य मायावच्छिन्नचै

त्रि

२२

23

चैतन्याभिव्यंजकत्वेनापि बीजत्वं तादृशं ह्रींका
ररूपं बीजं यस्याः सा गें ह्रींकारबीजायै नमः ४
ह्रींकारमंत्रा ह्रींकारस्य मननात्त्रायते रक्षतीति वा
च्यवाचकयोरभेदादिति तथा ह्रींकार एव मं
त्रो यस्याः सा तथा गें ह्रींकारमंत्रायै ५ ह्रींका
रलक्षणा हकारः शिवश्चाकाशबीजत्वान्निपा
रेफो वह्निबीजं कार्योत्पादनसन्निहितशक्ति
मदीश्वरवाचकं तथा हकारयुक्तो रेफः शुद्ध
चैतन्यमेव कारणतावच्छिन्नमिति वदति ईका
रो मन्मथबीजं तत्कारणलक्षकतया स्थिति
हेतुर्विषयरूपचैतन्यमभिदधाति अत्रुस्मा
रस्तस्मिन्नेव पदार्थे अभिन्ननिमित्तोपादाने
लयं वक्ति तथा च ह्रीमित्येकं जगदुत्पत्ति
स्थितिलयकारणं चैतन्यं शक्त्या वाच्यार्थः
प्रतीयते तस्यैवोपाधिपरित्यागरूपलक्षणा य
स्याः सा तथा ह्रींकारो लक्षणं यस्याः सेति
वा तथा ह्रींकारघटितमंत्रो वा यस्याः सा त
था ह्रींकारलक्षणायै ६ ह्रींकारजपसुप्रीता
ह्रींकारस्य जपो.

ह्रींकाररूपत्वेन सुप्रीता ॐ ह्रींकाररूपसुप्री
तायै नमः ९ ह्रींमती वाचकत्वेन लक्षकत्वेन
वा विशिष्टतदर्थरूपेण वा वाच्यवाचकयो
रभेदेन यस्या अस्तीति ह्रींमती ॐ ह्रींमत्यै नम
ह्रींविभूषणा केवलजडमायावाचको ह्रीं
कारस्तथाहि हकारः श्वेतपदार्थको रेफोरक्
तार्थकः ईकारो नीलार्थकः तथा च विशि
ष्टस्य शुक्लरक्तनीलवर्णपदार्थवाचकतया स
त्त्वरजस्तमोगुणवत्प्रकृतिवाचकत्वेन परि·
च्छिन्नानन्तः स्वरूपवाच्यार्थकतया प्रकाश
राहित्येनानुपासना देवतायां समतां तदवच्छिन्न
स्वप्रकाशचैतन्याकारतया विशिष्टार्थस्या·
पादमस्तकभूषिततरुणीवदानन्दस्वरूपतया
तद्वाचकह्रींपदस्यापि ऐश्वर्यसिद्धिप्रदानशक्त्या
धायकतया शोभायमानं भूषवत्कुंडली इत्यत्र
गुंडलस्योपलक्षणतया इतरसजातीयादि
व्यावर्तकत्वेन तथास्यापि बीजस्य इतरव्यावृत्ति
वाच्यार्थगोचरप्रमाजनकत्वेन भूषणवद्य·

स्याः सा तथा ॐ ह्रीं विभूषणायै ९ ह्रीं शीला
ह्रीमित्यनेन तद्वाच्यार्था ब्रह्मविष्णुरुद्रास्त
ते तेषां शीलं स्वभावः पारमार्थिकरूपं सच्चि
दानन्दात्मकता यस्याः सा तथा तन्निष्ठधर्मो
वा सत्वरजस्तमोगुणादयो वा यस्याः सा तथा
शीलं स्वभावो धर्मश्चेति वचनात् ॐ ह्रीं शी
लायै १० ह्रीं पदाराध्या ह्रीं पदेन पकादरी
वीजमंत्रेण चित्ते योग्या तथा ह्रींकारेणैव
संसिद्धो भुक्तिं मुक्तिं च विंदति इति भुवनेश्वरी
कल्पवचनात् इति ॐ ह्रीं पदाराध्यायै नमः ॥
ह्रीं गर्भा ह्रीं शब्दार्थः सकलसगुणमूर्तयः शि
वो गर्भे स्वस्वरूपे सशक्तिनाविनाभावसंबं
धेन यस्याः सा तथा मम योनिर्महद्ब्रह्म तस्मि
न्गर्भं दधाम्यहमिति भगवद्वचनात् ॐ ह्रीं ग
र्भायै ११ ह्रीं पदाभिधा ह्रींकारोभिधानाम यस्याः
सा तथा समष्टिरूपायाः समष्टिशब्दवाच्यत्वनिय
मादित्यभिसंधिः ह्रीं पदाभिधायै १२ ह्रींकारवा
च्या मायोपाधिकब्रह्माणी कल्पितधर्मेण शब्दब्र
ह्मसपपन्नेः ।

ह्रींपदवाच्यानुष्ठार्थाइत्यर्थः ह्रींकारवाच्यायै·
ह्रींकारपूज्या मूलमंत्रेण पूजयेदिति पूजांगत्वे
न मूलमनोर्विनियोगः श्रूयते मूलमनुश्च दे
वतायाः स्वकनामेति वचनादेतन्मुख्यनामस्य
व मंत्रशास्त्रेषु तन्नाम्नाप्युत्पन्नत्वात् ह्रींकारेन
मेतमुच्चार्य यथागुरुसंप्रदायश्रीचक्रादौ मूल
देवता पूजनीयेत्यागमरहस्यात् ह्रींबीजेनैव स्व
जितं योग्या प्रतिप्रियबीजनामत्वादित्यभि·
प्रायः ह्रींकारपूज्यायै नमः १५ ह्रींकारपीठि
का सर्वपीठशब्दशब्दाधारत्वकः वाच्या
र्थे हि वाचकशब्दस्य सत्यपदत्वेनाधारो भवति
मंत्रदेवतयोरभेदेऽपि अर्थनिष्ठमहिम्नस्तद्वा
चकपदे दृश्यमानत्वात् कल्पितभेदसंपादे
दमुच्यते ह्रींकारस्य पीठिकाह्लानिस्थानं शा·
स्त्रागोचरतायां विषयभूतेत्यर्थः ह्रींकारपी
ठिकायै· १६ ह्रींकारवेद्या स्वरूपतो निर्गुण
ब्रह्मात्मकतया ज्ञानविषयाश्रयत्वाभ्यामथा
र्थगुरुपार्थरूपतया संसारदशायां प्रतीयमा

त्रि
२५

नत्वानुरूपसदनश्रवणादिविधप्रामाण्यनि
रासायलक्षणयाशुद्धस्वरूपपरमानंदतयाभी
प्सितत्वाच्छ्रवणादिजन्यवृत्तिव्याप्यत्वरूपवेद्या
विषयत्वेब्रह्मणप्रत्याननाशायवृत्तिव्याप्तिरपे
क्षितेति मामेवयेप्रपद्यंतेमायामेतांतरंतिते
इत्यादिभगवद्वचनात् भगवत्प्रसादादिभिरंगी
कृतमिति ह्रींकारेणगुरुमुखाच्छ्रुतेनवेदि
तुंयोग्यातत्स्वरूपपरिज्ञानद्वारातत्प्राप्तिरूपा
पुरुषार्थहेतुत्वादित्यर्थः ह्रींकारवेद्यायै.
ह्रींकारचिंत्या ब्रह्मबीजस्यपंचप्रणवांतर्गत
त्वेनोंकाराभेदेब्रह्मप्रतीकत्वाविशेषात् प्रण
वेपरापरब्रह्मोपासनहेतोरस्मिन्वाप्रतीके न
हृतीतिविकल्पः यथाभक्तिपार्थक्येनमंत्रवि
शेषेषुभवतीतियोगवेदमार्गरहस्येनवाद
जल्पाद्यवकाशः ह्रींकारेऽभयविधब्रह्मस्वरूप
तयाचिंतितुंयोग्या ध्यानस्यसाक्षात्कारप्रत्या
हाराद्युपकारकत्वेनध्यानयोग्येत्यर्थः ॥
गोंह्रींकारचिंत्यायैनमः १८ ह्रीं हृस्

८

स्वरूप इतियावत्स्वरूपाद्वत् सर्वविद्यैश्वर्यप्रदाना
दिशक्त्याद्युपाधिस्थानत्वेन सत्यवादाविशेषित
परमानंदस्वरूपामुक्तिरित्यर्थः ऐंह्रीं नमः १९
ह्रीं शारी रिरमी मूलमंत्रात्मिकेतियावत् ह्रीं मे
वशारी रेमूर्तिर्यस्याअस्तीति ह्रीं शारी रिरमी ऐं
ह्रीं शारी रिरपेनमः २० इतिश्रीत्रिशतीनाम
प्रकाशिकायांह्रींकारनामार्थप्रकाशनंना
मपंचमंप्रकरणम् ५ अथद्वितीयकूटनिर्णयं
हकारस्वरूपा हकारोरूपंयस्य वर्णावयवोयस्याः
सामूलविद्यावाच्यार्थवाचकंयस्याः सातथा
ऐंहकारस्वरूपायै १ हलधृक्वरजिताः हलेयु
गंधरेइति तद्धारयतीति हलधृक् बलराम
स्तेनप्रजिताध्यानादिनेत्यर्थः ऐं हलधृक्वर
जितायै २ हरिणीक्षणा हरिणस्याइवईक्ष
णेवीक्षणंयस्याःसातथा अतिसंतोषरणका
तरात्तीतिभावः ॥

त्रि॰ सर्वत्रसर्वदाहृष्टीतिवाभक्तेष्वादरहेतुर्दर्शन
२९ नवतीतिवा ॐ हरिणीसगणायै॰ ३ हरप्रिया
२० हरस्यप्रियाशिववल्लभेत्यर्थः हरःप्रियोय
स्याःसेतिवा ॐ हरप्रियायै॰ ४ हराराध्या ह
रेणस्वभर्त्राप्याराधितुंयोग्याकेवलचिदानं
दरूपत्वात् ॐ हराराध्यायैनमः ५ हरिब्रह्मे
न्द्रसेविता हरीरमेशः ब्रह्मावाणीशः इंद्रो
देवेशः उपलक्षणंसर्वदेवभेदानांतैर्वंदिता
नमस्कृता ॐ हरिब्रह्मेंद्रसेवितायैनमः ६
हयारूढासेविताङ्घ्रिः हयारूढानामश्वस्वमा
ग्रसेनानीशक्तिर्वश्यकरीतयासेविताङ्घ्रीयस्या
सातथा ॐ हयारूढासेविताङ्घ्र्यै॰ ७ हयमे
धसमर्चिता हयमेधेनाश्वमेधेनसमर्चिता
पूजितापुरुषत्वादिप्राप्तये इक्ष्वाकादिभिरित्य
र्थः ॐ हयमेधसमर्चितायै॰ ८ हर्यक्षवाहि
नी वाहयतीतिवाहनं हर्यक्षःकेसरीसवा
हनंयस्याःसातथा महालक्ष्मीरूपेदुर्गेत्यर्थः
ॐ हर्यक्षवाहिन्यैन॰ ९ हंसवाहना हंतिगच्छ
तीतिहंसः सूर्यःप्राणोवावाहनवदाधारभू

तमत्येकमित्यर्थः अभिव्यक्तिस्थानमिति याव
त् सूर्यस्यायंपुरुषेयश्चासौवादित्येसएकेइति
श्रुतेः अथवा हंसवाहनाब्राह्मीरूपेत्यर्थः
ॐ हंसमनायै नमः १० हतदानवा हतायेदानवा
अनेकप्रकारशक्तिरूपधरया महासुरादयः
यया सा तथा ॐ हतदानवायै ११ हत्यादिपाप
शमनी हत्या ब्रह्महत्यादिर्येषां तानि तथा
पापानि शमयतीति तथा हरिर्हरति पापानी
ति वचनात् ॐ हत्यादिपापशमन्यै नमः १२
हरिदश्वादिसेविता हरिर्हरोगोमरकतइवाथो
यस्येन्द्रस्य तथा सप्तादिर्येषां दिक्पतीनां तैः से
विता चरणारविंदसन्निधिकिंकरतयाश्रिते
त्यर्थः ॐ हरिदश्वादिसेवितायै १३ हस्तिकुं
भोत्तुंगकुचा हस्तोस्यास्तीति हस्ती गजस्तस्य
कुंभौ गंडौ तद्वदुन्नतौ सांद्रौ कुचौ यस्याः सा तथा
ॐ हस्तिकुंभोत्तुंगकुचायै नमः १४ हस्तिकृत
प्रियांगना हस्तिनः कृत्तौ चर्मणि प्रियः प्रीति
मान् शिवस्तस्यांगना भामिनीत्यर्थः ॐ हस्ति

हृत्प्रियांगनायैनमः १५ हरिद्राकुंकुमादिग्धा
हरिद्राकुंकुमाभ्यामुपलक्षणेकस्तूरीपङ्कादी
नांदिग्धालिप्तेत्यर्थः ॐ हरिद्राकुंकुमादिग्धा
यै १६ हर्यश्वाद्यमरार्चिता हर्यश्वःसुरेशआ
दिर्येषांअमराणांतैरर्चिताकिंकरतयानिया
मत्वेनपूजितेत्यर्थः ॐ हर्यश्वाद्यमरार्चितायै १७
हरिकेशसखी हरिर्हरणःकेशाःशिरोरुहा
यस्यसहिरण्यश्मश्रुः हिरण्यकेशइतिश्रु
तेः तस्यसखीप्रयोजनमनपेक्ष्योपकारिणी
त्यर्थः वर्णेननीलेनहरिणाविषाउनासमाः
शिरोरुहा अस्याअस्तीति सर्वांगसुन्दरनित्य
यौवनचिह्नपरहितकामेश्वरइतिवार्थः ॐ ह
रिकेशसख्यै १८ हादिविद्या लोपामुद्रोपा
सितमन्त्ररित्यर्थः ॐ हादिविद्यायैनमः १९
हालामदालसा हालायाअमृतमथनोद्भूत
वारुण्यामदेनोल्लासात्रक्तनेत्रांतरोमांचादिचि
ह्नवतीत्यर्थः हालामदालसायै २० त्रिशती
द्वितीयखंडप्रथमवर्णनामार्थप्रकाशने ६

सकाररूपा सकारोरूपंद्वितीयावयवत्वेनत्ताप
कोयस्यासातथा ॐसकाररूपायैनमः १ सर्वज्ञा
अखिलमनित्यज्ञानस्वरूपेणसामान्यरूपेणसर्वं
जानातीति सर्वज्ञा यःसर्वज्ञ इतिश्रुतेः ॐस
र्वज्ञायैनमः २ सर्वेशी सर्वस्यकार्यकारण·
स्यांतर्यामिरूपेणैवप्रेरयतीतितथा ॐसर्वे
श्यैनमः ३ सर्वमंगला सर्वप्रकारेणशुद्धवि·
शिष्टचैतन्यरूपेण मंगलापरमानंदस्वरूपा
अत्रबहुव्रीहेरविवक्षितत्वाद्विवतायावासुंदर
कामराजेत्यादिवत्समासार्थः अथवा सर्वेषां
मंगलायतः सासर्वैःप्रकारैःध्यानकीर्तनपूजा
नमस्कारयत्नभक्तिजनकैःकार्यैर्जडानामपि
मंगलंसुखंयतः सकाशात्प्राप्यतेसातथा
सर्वेषामात्मरूपतयाप्रतीयमानेमंगलंसुख
स्वरूपंयस्यासेतिवा सर्वशब्दवाच्यःसर्वकार
णंशिवः तस्यमंगलंसुखंयस्याजायतेसात
था सच्चिन्मयःशिवःसाशीतस्यानंदमयीशि
वेतिविचारः अथवा मंगलशब्देन मंगलहेतु

त्रि
१८

28

भूताः स्त्रियो लसंते सर्वेषां प्राणिनां मंगलं मं
गलसाधनभूता योषाः स्वाभिन्नसच्चिदानंदत्वे
नयस्याः सा तथा एतस्यैवानंदस्यान्यानि भूता
नि भूतानि मात्रामुपजीवंति इति श्रुतेरित्य
र्थः अशुभानि निराचष्टे तनोति शुभं संततिं
स्मृतिमात्रेण यत्पुंसां ब्रह्म तन्मंगलं विदुः अ
तिकल्याणरूपत्वान्नित्यकल्याणसंश्रयात्
स्मर्तॄणां वरदायित्वाद्ब्रह्म तन्मंगलं विदुरित्या
दिवचनात् ॐ सर्वमंगलायै० ४ सर्वकर्त्री
सर्वं समस्तं स्वशक्त्या मायारूपया करोतीति
तथा ईशत ईशनीभिर्जननीभिः परमश
क्तिभिरिति श्रुतेः ॐ सर्वकर्त्र्यै० ५ सर्वभर्त्री
सर्वं बिभर्तीति तथा एष विभूतिरेषां लोका
नामिति श्रुतेः ॐ सर्वभर्त्र्यै नमः ६ सर्वहर्त्री स
र्वं हरतीति तथा एभिर्नामभिस्त्रिभिर्यतो वा
इमानि भूतानि इत्यादि श्रुत्युक्ततटस्थलक्षण
त्रयमभिहितमिति वेदितव्यं ॐ सर्वहर्त्र्यै० ७ स
नातना अजो नित्यः शाश्वतोयं पुराणो इति श्रु
ते नित्यशुद्धबुद्धस्वरूपत्वाच्च ॥

ॐसनातनायै॰ ८ सर्वानवद्या सर्वैर्नैश्वर्या
दिगुणैरनवद्याअवद्यंनामकयापिविषयाही
नाज्ञःप्रकृतिर्मिथ्याबाध्यमानत्वान्नहिचत्तरणा
सत्यज्ञानानंदस्वरूपत्वादनवद्यासर्वेषांस्वस्ता
भीष्टप्रापकत्वेनस्तुत्यावा ॐसर्वानवद्यायै॰
सर्वांगसुन्दरी सर्वाणिचतानिअंगानिचावय
वाः शिरःपाणिपादयस्तेष्वन्यूनातिरिक्तभाव॰
त्वाद्यथासामुद्रिकलक्षणानहत्वेनसर्वांगसुंद
री अथवा सर्वेषामंगेषुशरीरेषुब्रह्मस्वरूपत
यात्यंतप्रेमविषयत्वेनसुन्दरपदार्थवदविनाभा
वंवांछाविषयत्वात्तथा ॐसर्वांगसुन्दर्यै॰
सर्वसाक्षिणी सर्वेषांमूढानांकार्यारंभास्फू
र्त्तिदायकत्वेनप्रकाशकत्रीतया सर्वसाक्षी
दीप्तिन इतिवात्तथा ॐसर्वसाक्षिण्यैनमः
सर्वात्मिका सर्वेषामात्मस्वरूपत्वात् यच्चा
प्नोति यदादत्ते यच्चाति विषयानिह यच्चा
स्यसंततोभावस्तस्मादात्मेतिगीयते इतिव
चनात्तथा ॐसर्वात्मिकायै॰ १२ सर्वसौख्य

त्रि
२६

29

दात्री सुखविनोभावः सौख्यं सर्वाण्येतानिप्रि
यमोदप्रमोदानंदशब्दवाच्यानिइष्टदर्शनजन्य
सुखंप्रियंतल्लाभजन्यंमोदः तदनुभवजन्यंप्र
मोदश्चानंदः समष्टिजीवोभोक्तातानिददाती
ति तथा सर्वप्रकारैःस्मरणादिभिः सौख्यंद
दातीतिवा सर्वेषामाब्रह्मस्तंभपर्यंतानांयः
याकर्मोपासनेप्रत्यतेनदृश्यमानंज्ञानैश्वर्या
दिसहितंसुखंददातीतिवा एषह्येवानंदया
तिश्रुतेः ॐसर्वसौख्यदात्र्यै० १३ सर्वविमोह
नी सर्वान्विमोहयतीति अन्यथाग्राहयति
अज्ञानेनावृतंज्ञानंतेनमुह्यन्तिजंतवः अन्दजे
नाहिप्रत्यह्वाइति स्मृतिभ्यां अज्ञानावरण
शक्तिकार्यमोहनादिसत्ताप्रकाशादिप्रदापि
ष्ठानत्वेनोपचारात्सर्वमोहिनीत्युच्यते अयो
दहतीतिवत् ॐसर्वविमोहिन्यैनमः १४
सर्वाधारा सर्वस्याधारो ब्रह्मपुच्छंप्रतिष्ठेति
श्रुतेः सर्वेषांहृदयान्याधारोभिव्यक्तिःस्था
नमुपासनायाः सेति तथा ॥

ॐ सर्वाधारायै नमः ५५ सर्वगता सर्वं गच्छति
तथा अनेन जीवेनात्मनानुप्रविश्येति श्रुतेः
ॐ सर्वगतायै नमः ५६ सर्वावगुणवर्जिता अ
वमानहेतवश्चतेगुणाश्च तथा अध्यासिकसं
बंधेनारोपिताः सत्वादयः समष्टौ अंतःकरण
धर्माः कामादयो व्यष्टौ सर्वे च ते अवगुणाश्च त
था सर्वान्तर्यामित्वेन सर्वानुस्यूतत्वेपि तदुपा
धिनिष्ठान मायमयधर्मेण संबध्यते घटादिनि
ष्ठाकाशवत् कोशांतर्गतखड्गवद्वा सूर्यो य
था सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्य
दोषैः एकस्तथा सर्वभूतान्तरात्मा न लिप्यते
दुर्लोकदुःखेन बाह्य इति श्रुतेः ॐ सर्वावगु
णवर्जितायै न० ५७ सर्वारुणा सर्वेष्वंगेष्वरु
णा आरक्तवर्ती असौ यस्मात्ताम्रो अरुण इति श्रु
तेः ॐ सर्वारुणायै न० ५८ सर्वमाता सर्वेण
कार्येण मीयते अनुमीयते अभेदेनेति तथा हि
इदं जगद्ब्रह्माभिन्नं तत्सत्तास्फूर्तिनियतसत्ता
प्रकाशज्ञानविषयत्वात् यो यन्नियतसत्ता

त्रि

३०

30

प्रकाशवान् सनदभिन्नः यथातेनकार्यपद इतिसर्वात्मिनोति स्वाभेदेनजानीतेइति तथा गेसर्वमावे० १९ सर्वाभरणभूषिता सर्वात्मक त्वेनयेयेप्राणिनोयानियानिभूषणालंकार भोजनादिभोगवस्तून्यात्मार्थेसंपादयति ते षां सर्वेषांप्रत्यक्षिपातेः सर्वैर्भूषितेत्युपक्षते त्यर्थः आत्मनस्तुकामायसर्वंप्रियंभवतीति श्रुतेः अथवा सर्वदेवात्मकत्वेन सर्वभक्तजन स्वस्वेष्टदेवतार्थीमर्थभूषितभूषितत्वेन तथा अथवा सर्वैर्भक्तजनैस्तत्तद्वयवेषुभूषणेरा रोपिता स्वसा महाराज्ञी त्वेनासंगोदासीनस्व भावत्वादिति भावः यद्वा सर्वदेशकाललो केषुभूषणेत्वनप्रभवेरुच्चावचैर्भूषणैरभूषि ता हस्तस्थ्यादिदेहोपाधिकासतीतत्तदीया लंकारादिषु विरहितेत्यर्थः भूषयति सर्वा त्मत्वेनप्रतिपादयंतीतिभूषणानि वेदांतम हावाक्यानिसर्वैः समस्तैस्तैर्गतिसामान्यादेक तात्पर्येणभूषितस्तत्तयापर्यवसितासमन्व नावेत्यर्थः

गेंसर्वभूषभूताषितायैनमः २॰ इतित्रिशतीना
मार्थप्रकाशिकायांद्वितीयखंडद्वितीयवर्ण
नामार्थप्रकाशनेनामसप्तमंप्रकरणं २ क
कारार्था कंब्रह्मेतिश्रुतेः तस्यसुखोर्थः स
च्चिदानंदलक्षणंब्रह्मैवब्रह्मैवेदंसर्वंब्रह्मैवेदं
सर्वमित्यादिश्रुत्या तद्व्यतिरिक्तस्यातदर्थस्य
बाधितत्वात् ॐककारार्थायै॰ १ कालहृद्री
ग्रजपारूपेणश्वासणपाननामकचंद्रसूर्ययो
यमनेपुरुषाणांनियामितपरमायुः स्वरूपैक
विंशतिषट्शताधिकसहस्रसंख्याकनिर्ग
तरूपेणसंख्यापयताग्रवशेषायुषोयुगक
ल्पाद्यवशिष्टसहस्रोपुनः पुनः संयमनेतथा
हृद्गोपुंजानस्य सर्वप्राणेन्द्रियवृत्तिलयेमनो
न्मन्यावस्थानिष्पत्तये तथाचश्रुतिः पृथि
व्यप्तेजोनिलखेसमुत्थिते पंचात्मकेयोगगु
णेप्रवृत्ते नतस्यरोगोनजरानमृत्युःप्राप्त
स्ययोगाग्निमयंशरीरमिति प्रथ्यात्मयोगा
भिगमेनदेहमत्वाधीरोहर्षशोकौजहातीति

तदानीमाविर्भूतब्रह्मस्वरूपेण ततः संवत्सरो
जायतेति श्रुत्या क्रियाशक्त्यात्मककालोत्पत्ति
श्रवणात्तस्मिन्ब्रह्मण्येव लये कालं हंति नाश
यतीति तथा नामनिर्वचनेप्युक्तमुत्पथपाम इ
तिभावः ॐ कालहंत्र्यै नमः २ कामेशी का
मानां भोग्यपदार्थानां यथाहृष्टमीष्टे प्रेरयती
ति तथा ॐ कामेश्यै० ३ कामितार्थदा का
मितानर्थान्ददातीति तथा आत्मकाम आत्म
काम इति श्रुतेः संसारदशायामाहृतानंद
स्यानात्मवदवभासमानस्यात्यंतिकस्वरा
त्मिकमुक्तिर्मे स्यादिति काम्यमानत्वादा
त्मनः कामितत्वात्सार्वज्ञ्येति तस्यै वज्ञा
नस्याभिभावकत्वेन प्राप्तप्राप्यरूपतया
तेददाति प्रयच्छति प्रकाशस्वरूपेणाव
भावयतीति तथा ॐ कामितार्थदायै नमः ४
कामसंजीवनी काममन्मथं परमेश्वरनेत्रा
ग्निविस्फुलिंगभंडासुरात्मनेककालदेवलोक
विपत्तं कामशास्त्रप्रयोगसमये रतिदेवीप्रा
र्थनासमीचीनं तदीयं पूर्वकामतनपश्चर्यापरिपाक

फलभूतकरुणारसपूरिता योगावलोकनेन
संजीवयति सप्राणं कृत्वा तस्मै वरादि प्रयच्छ
ति तेन तं हर्षयतीति तथा ॐ कामसंजीवन्यै·
कल्पा कलितं ध्यातुं योग्या अथवा सर्वोत्तम
देवतेनाराद्धं कलितुं योग्यात तत्कल्पा कलेः
कामधेनुत्वेन यथावांछमर्थकारणं ॐ कल्पा
यै· ६ कठिनस्तनमंडला स्तनयोर्मंडलं आदि
मभागो स्तांत प्रदेशो अप्रकंपे प्रति स्थिरे वा य·
स्याः सा तथा ॐ कठिनस्तनमंडलायै नमः ७
करभोरुः करभमिवोरू यस्याः सा तथा मणि
बंधादाकनिष्ठं करस्य करभो बहिरिति भावः
ॐ करभोरवे नमः ८ कलानाथमुखी कला
श्चतुःषष्टिर्नाथयति प्रेरयति प्रेरयतीति क
लानाथं निःश्वसितमेतद्यदो यजुर्वेदः सामवेद
इत्यादिश्रुतेः तादृशं मुखं वदनं यस्या अस्तीति
तथा कलानाथश्चन्द्र इव मुखं यस्या अस्तीति
तथा ॐ कलानाथमुख्यै· ९ कचजितांबुदा
कचेन केशभरेणावरेणेत्यर्थः जिताअपरीकृ

५

६२

त्रि

३२

32

नाग्रंबुदामेचाययासातथा मेचमंडलापेतया
गर्हेगामिशिरोरुहभाराख्योमकेशीतियावत्
अथवा केशावर्तिनीलरूपेणावासाहश्यपास
हत्वेनाधरीकृतामेचाययासातथा ॐकचवृ
तांबुदायैनमः ९ कटाक्षसंदिकरुणा यध
दिदीनेषुपरिपाल्यताबुद्धिर्देवादीनांमहती
करुणेत्युच्यते तथापि तस्याश्रांतरत्वेनाश्रा
ज्ञायनतायातेषुभक्तातिशयेन प्रहृत्यर्थमेवा
दौतहृताज्ञानस्यावश्यकफलदानादिहेतुत·
या निश्चयेनतदनुमायिकसात्विकवीतण
समेरसंभाषणादिवत्वं तत्रावश्यंभाविशति
कार्यसत्वप्रसंजित कारणसत्ववत्वात् करु
णायानवरसेष्वंतर्भावात् रसशाहृस्यवमधुरा
दौतृष्णत्वानेषामनिर्वचनीयत्वेप्यनुभवगोच
रतायामित्वादिस्मारडवपदार्थनिष्ठत्वोपलब्धे
स्तत्संबंधवशात्संपरयाद्रव्यद्रव्यहृतिस्पंदनरू
पक्रियाश्रयत्वमुपचर्यतेनतथाकटाक्षयोःसंद
तीकरुणापरिपालितावुद्धिरूपायस्याःसातथा

ॐ कदाञ्चसंदिकरुणायै नमः ११ कपालिप्राण
नायिका कपालमस्यास्तीति कपाली आनन्द
भैरवस्तस्य प्राणनायिका प्राणस्येत्युपलक्षणं
पंचानांनायिकाधिष्ठानत्वे सति प्रेरका नप्राणेन
नापानेन मर्त्यो जीवति कश्चन इतरेण तु जीवंति
यस्मिन्नेतावुपाश्रिताविति श्रुतेः तस्यामपि हृ
दयांतर्वर्ति परमेश्वररूपेति यावत् प्राणवल्ल
भेति वा प्रियनायिकेति भावः ॐ कपालप्राण
नायिकायै॰ १२ कारुण्यविग्रहा कारुण्यंस्व
वीक्ष्यकृपाकरुणस्वभावस्तद्विग्रहो मूर्तिरस्या
अस्तीति तथा कारुण्यस्यातःकरप्रदानादीनां
शरीरावयवविशेषजन्यतया कारुण्यंविग्रहो
यस्या इति समासोपपत्तिः मायोपाधिकस्य ब्र
ह्मणो जगत्सृष्ट्यनुकरणहेतुभूतस्वेच्छामात्रनि
मित्तकर्माधीन सच्चिदानन्दघनीभावात्मकभ
क्तानुग्रहविग्रहवतां विना देवतायोवृत्त्यामना
रोहि सगुणोपासनमनुपपद्यमानं स्यात् तद
र्थे देवताधिकरणे मंत्रप्रकाशिता देवता वश्र

त्रि
३२

हस्तः शुभंदरइत्यादिस्वतः प्रमाणवेदवाक्यव
शाद्बाधकाभावेविग्रहवत्त्वांगीकर्तव्यमितिसूत्र
कारभाष्यकाराभ्यांप्रतिष्ठापितं तन्न्यायेनमांहै
मवतीमिति केनोपनिषद्भाष्ये हैमानिहेमवि
काराणिभूषणानि प्रस्पाइति तथा हिमवतो
पत्यंस्त्रीतिवा तथेति श्रीभाष्यकारः परदेवता
यादिव्यमंगलविग्रहत्वंप्रतिष्ठापितं तथाच महानु
भावानां स्वप्रकाशचैतन्यरूपाणां एवंभूतानां
सर्वोत्तमानांमूर्तित्रयतत्कृष्णवादिदेवताध्याना
द्युपकारायतादृशामूर्तिमत्त्वमस्तीति नकिं
चिदनीश्वरशंकाशाइत्यास्तांविस्तारः ॐका
रूपविग्रहायैनमः ६ कांता कास्त्रीमा
वितिपातरस्यंतमनोहरत्वमेवेत्यर्थः मदन
गोपालविग्रहोवा कदाचिदाद्यालिताशु
रुषाकृष्णविग्रहाबेणुनादसमारंभादकरो
द्विवशंजगत् इति त्रिपुरतापनीये ॐकांता
यै॰ ७ कांतिधृतजपावलिः जपानांजपापु
ष्पाणामुपलक्षणमन्येषामारक्तवर्णानांवस्त्

32

नांश्रावलिः पंक्तिर्द्दीर्घांतत्वेनकाविभिरुत्प्रेक्षिति
ताकांत्याश्रप्राकृतस्वच्छपरमानंदविज्ञासाधुः
तापरित्यक्ताश्राकृततत्वेनाल्पकांतिमतयोपमा
श्रयोगपतयायया सा न महांतोनीचैरुपमीयं
तेइतित्यायापादितिभावः ॐकांतिस्तनपाव
स्येनमः १५ कलालापा कलाश्चतुःषष्टिक
लाश्चालापोव्यावहारिकशब्दोयस्याः सातथा
वेदशास्त्रमयीवाणीयस्याः सापरदेवतेतिव
चनात् कलमव्यक्तमधुरः सप्रयोजनश्चाला
पश्चालापोयस्याः साइतिवातथा श्रव्यशोभा
रतीतथेति पुरुषसामुद्रिकवचनात् ॐक-
लालापायै॰ कंबुकंठी कम्बुशब्देनशंखविनिष्ट
रेखात्रयंलक्ष्यते तद्वात्कंठोयस्याः सेतितथा
गौणनामेदं ॐकंबुकंठ्यै॰ १६ करनिर्जित
पल्लवा करशब्देनकरतलंलक्ष्यते पल्लवश
ब्देनतद्विशुपाटल्यात्किशलयतालतरणायार्थः
तथाचान्योन्यगुणयोर्जयपराजये अर्थान्तद
तोनपितैः स्त्रियाविति तन्नामोपपत्तिः वि

वाद्यस्यविवादस्यसमयोरेवशोभतेइतिवच
नात् करतलतत्साम्यधनिरनेननाम्नाकृता
करेणनिर्जिताःपल्लवाययासातथा ॐकर
निर्जितपल्लवायैनमः १८ कल्पवल्लीसमभुजा
यथादिव्यहुतानंदनोयानेशसिद्धास्तथातद्
लंकारायवल्ल्यादयोपिकल्पयंतेसंपादयंते
इतिकल्पाः कल्पाश्चतावल्ल्याश्चव्रततयस्ता
भिःसमाभुजाहस्तादयःसातथा कविसंप्र
दायप्रसिद्धीभुजानांवल्लीसाम्योक्तिरिति
मंतव्यं अन्यसमपदस्वारस्येनतेषामपितद
वच्छिन्नचैतन्यद्वारायथा प्रारब्धंचेतनव
ल्लोकेवांछितफलकत्वमितिध्वनितं एक
स्तथासर्वभूतांतरात्मारूपंरूपंप्रतिरूपो
बभूवेतिश्रुतेः तन्नदेवावगच्छत्वंममतेजों
शसंभवमितिस्मृतेश्च भगवतास्वकीयस
च्चिदानंदस्वरूपावस्थितिरेवोक्ता अतएव
परदेवताभुजानांनीचसाम्योक्तिशंकानि
रस्तावेदितव्या ॐपाधिकचैतन्येनतथाभूत
चैतन्यस्यसाम्योपपत्तिः ॐकल्पवल्लीसमभुजायै १९

कस्तूरीतिलकांचिताकस्तूरीतिलकेनललाटे
देशस्थापितहिंबाकारमृगनाभिना अंचिता॰
चिह्नता अलंकृतेत्यर्थः ॥ कस्तूरीतिलकां
चितायै॰ २॰ इतिश्रीत्रिशतीनामार्थप्रका
शिकायां द्वितीयखंडस्तृतीयवर्णनामार्थप्र
काशनमष्टमंप्रकरणं ८ हकारार्णा हका
रस्याकाशबीजस्यार्णा अर्थस्वरूपा चैतन्याका
शावियहेत्यर्थः आकाशोहवैनामनामरूप
योर्विहितातेतदंतराद्ब्रह्मेतिश्रुतेः ॥ हकारा
र्णायैनमः १ हंसगतिः हंतिगच्छतीतिहंसः
प्राणश्चादित्योवा हंसस्यप्राणस्यगतीगमना
गमनेलक्षणायातज्ज्ञाप्याजपामंत्ररूपायास्ते
यस्याः सातथा हकारेणबहिर्यातिसकारेण
विशेत्पुनरिति वचनात् तदभिमानिदेवता
रूपाग्नीषोमात्मकसूर्यचन्द्रगती अहोरात्रात्म
ककालस्वभावायायस्याः सातथा हंतिदेहा
द्देहांतरंगच्छति स्वकर्मवशेनेति हंसोजीव
स्तस्यगतिः प्राप्यस्थानंमुक्तिरित्यर्थः ब्रह्मवि

द्धामेतिपरं यद्गत्वाननिवर्तंते इतिश्रुतिस्मृ
तिवचनात् अथवाहंतिस्वकार्यभूतंजगत्प्रवि
शतीतिहंसः हंसस्तु परमेश्वर इति नृसिंह
तापनीयेगम्यते प्राप्यतेशरणत्वेनप्रपद्य
तेचतुर्विधभक्तैरितिगतिः हंसश्चासौगति
श्चेतिसमानाधिकरणसमासः हंसः शुचि
षदितिश्रुतिः आहोस्विद्धंसस्यब्रह्मवाहनस्य
गतिरेवगमनंयस्याःसातथा उत्कृष्टोहंसश
ब्देननित्यानित्यसारासारजडाजडादिवस्तुवि
वेकसामर्थ्यात् घ्नंतिगच्छन्तिप्रतियामंप्रति
देशमितिहंसाः परिव्राजकास्तत्पर्याश्रमि
णोनिष्कामास्तेषांगतिर्ज्ञायतेगम्यतेसाक्षा
त्क्रियन्तेइतिगतिः संन्यासयोगाद्यतयःशु
द्धचित्ताइतिश्रुतेः येपूर्वेदेवाऋषयश्चतद्वि
दुस्तेतन्मयाऋषयश्चतद्विदुरितिश्रुतेः जी
वन्मुक्तपुरुषानुभूयमानपरमानंदसाक्षिस्वरू
पेत्यर्थः ॥ हंसगतयेनमः ॥ २ हाटकाभरणोज्ज्व
ला हाटकस्यसुवर्णस्यकार्याणीतिचतान्या

भरणानिहाटकाभरणानितैरुज्वलातथा

प्रकाशितालंकृतेत्यर्थः हाटकस्यस्वर्ण

रूपस्यव्रह्मांडस्याभरणावद्वज्वलाप्रकाश

करीसत्तास्फूर्तिकरीत्यर्थः यद्वा तस्मिन्नाभ

रणेमंगलसूत्रादिभिःसनाथस्त्रीमंडलस्व

रूपैरुज्वलतीति आहोस्वित्कार्यकारणात्म

यत्स्वरूपवस्तुदानेनवस्तुस्वरूपेणवा उज्वलति

प्रकाशतेइति तथावस्त्वन्तरितसदितिश्रु

तेः ॐ हाटकाभरणोज्वलायैनमः २ हारा

हारिकुचाभोगा हरस्यपरमेश्वरस्य इमेसं

वंधिनः हारा ईश्वरत्वाप्रकामत्वानित्यत्वप्र

त्वादयोगुणास्तान्हरति तद्विपरीतातिघाद

नेनोत्पादयतीति हाराहारीकुचयोराभोगः

पर्यंतभूमिर्यस्याःसातथा परमेश्वरस्यतदि

क्षपकवांछयातदेकमत्कमानसत्वेनतत्कार

णीभूताज्ञानवशवार्तित्वेनवशीकृतमायाख्य

रूपेश्वरत्वसामानाधिकरण्यामकामत्वादयोप

हृता जीवेश्वरत्वयोर्नैकत्रतेषांतद्गुणानांसामा

नाधिकरण्ययोगादित्यर्थः

त्रि

३९

38

तथाचेश्वरस्य मदिष्टसाधनमित्यन्यत्रपदार्थे
बुद्धिमत्वस्यैव बहुभवनरूपतया तस्य जगदा
धारत्वाधायकहृत्यधिगुणवत्वोत्मेहा विषय
त्वेनाभोगस्यातिशयोक्तिरिति द्रष्टव्यं अथवा
ह्राराह्मकास्त्वजोहरति आयत्त इति ह्राराहारी
ऋचाभोगोयस्याः सेति तथा षट्प्रकारं शुक्ला
ह्रारेण यथोचितकाले भूषितवतीत्यर्थः ॐ
ह्राराहारिऋचाभोगायै॰ ४ ह्राकिनी ह्राकय
ति जन्ममरणयोः खेदयतीति ह्राकिनी ह्रा
कखेदइति धातुपाठात् ॐ ह्राकिन्यै नमः ५
हल्लवर्जिता हल सम्बन्धि हल्लं कृष्यादिह्रारा
जनकत्वे तद्वर्जितमायादिविहीनः शुद्धचैत
न्यस्वरूपत्वात् हल्लंकपटोमित्रेष्वपि अन्यथा
स्वांतःकरणविकृतिस्तेन वर्जिता अविचार
हितत्वं पदार्थभूतत्वादिति यावत् ॐ हल्ल
वर्जितायै नमः ६ हरित्यनिशमाराध्या हरि
त्वादिशापतयो महेन्द्रादयस्तैः सम्यक् शुद्ध
भक्तिः सर्वकमाराधितत्वं योग्यतान हिपदति

वर्हणेनेष्टप्रापकदेवतात्वादित्यभिसन्धिः
ॐ ह्रीं नित्यन्तिसमाराध्यायै ७ हठात्काराहृता
सुरा हठात्कारेणेति प्रीत्युन्नतया हृता पराभू
ता असुराः स्वविपक्षा महिषादयो यया सा
तथा समबलयोः किल बलाबलविचारणा
च भवति प्रबलस्य दुर्बलेषु वैरिषु सिंहस्य मे
षेष्विव तद्योगे नातित्वरया विचारणैव देव
लोकस्य स्वप्रवेशितानामर्थे विचारणायामि
तरेषु कैमुतिकन्यायेन तत्करणं धनितमिति
योजनीयं ॐ ह्रीं हठात्काराहृतासुरायै ८ हर्षप्र
दा हर्षो नामानन्दकारको मुखविकासादिका
र्यो नेयः स्वात्मसंभावनेन स्मारिभवनिमित्तश्चि
त्तवृत्तिविशेषः कार्यस्य कारणाविनाभाव
तया तत्प्रदानं तद्धेतोरप्यादिपत्तीति सुखप्र
दा इत्यर्थः प्रददातीति प्रदा यद्वा हर्षं धनयौ
वनादिसुखं पुत्रबन्धुवर्गादिरूपेणापहृत्य प्र
कर्षेणापयति खंडयतीति वा तथा ॐ हर्षप्रदा
यै नमः ९ हविर्भोक्त्री सब्रह्मा साशिवः सेन्द्र

त्रि
६०

इतिश्रुतेः वसुरुद्रादित्याकारेण हवींषिय
जमानेनाग्नौ प्रक्षिप्तानि स्वाहामुखेनभुक्तेइ
तितथा यद्वाहवींषिकर्मांतरभाविफलात्म
दृष्टात्मना सूक्ष्मरूपाणितमयजमानजीव
गतानिभूतसूक्ष्माभिधानानिसमष्टिव्यष्ट्या
त्मनाईश्वरजीवोपाधिभूतानिमायाविद्याश
ब्दितानिमुक्तिपर्यंतंभुनक्तिपालयतिरक्षय
तिवा तथा अन्यथासंसारस्यानादित्वाभावे
नादिमशरीराद्युत्पत्तौ उपरिक्रियमाणयो
प्रपंचस्याकस्मिकत्वमकृताभ्यागमप्रसंग
श्चस्यादितिभावः गेहविभैद्येन· १· हार्द
संतमसापहा हृदयावच्छिन्नोहार्दोयोवेद
निहितं गुहायामितिश्रुतेः तस्मिन्यत्संतम
समावरकत्वात्तमआसीदिति श्रुत्याचात्मवि
षयकतदाश्रयमज्ञानमनर्थकारिअव्याकृतमा
काशमित्युच्यते महावाक्यश्रवणाजन्यधीवृत्ति
प्रतिफलितकेरणापहंतीतिसातथा नाहंब्र
ह्मास्मिसंसारीअल्पनास्तिनभातीति अज्ञानसा
हं ब्रह्मास्मीति,

सच्चिदानन्दलक्षणमित्येकाकारवृत्तिबाधित्व
नियमेन वा तदधिष्ठानेन वा नेह नानेति श्रुति
प्रसिद्धब्रह्मस्वरूपेति यावत् ॐ हार्दसंतमसा
पहायै ॥ ११ हल्लीसलास्यसंतुष्टा हल्लीसैस्त्रि
दंडैः क्रमादिकाभिरेकतालादिगतिसर्वकंप·
ब्रासंयनर्तनेन तस्मिन्संतुष्टा प्रीतिमतीत्यर्थः ॐ
हल्लीसलास्यसंतुष्टायै ॥ १२ हंसमंत्रार्थरूपिणी
हंसैः परमहंसैरुपास्यो यो मंत्रः शास्त्रचोदित·
त्वान्तस्यार्थरूपवती वाचालक्ष्यार्थस्वरूपेण ज्ञा
यमानेत्यर्थः यद्वा हंसमंत्रोऽजपा हकारसका
रशोधितत्वंपदार्थो हकारस्यापरोवाचिनः
साकारस्य तादृशस्य भागत्यागलक्षणया नि
ष्पन्नं नित्यशुद्धबुद्धमुक्तसच्चिदानंदस्वरूपेत्यर्थः
हंसमंत्रार्थरूपिण्यै ॥ १३ हानोपादाननिर्मुक्ता
अनिष्टसाधने दानं परित्यागक्रिया इष्टसाधने
उपादानं स्वीकारक्रिया परिजिहीर्षा आदित्सा
वाग्प्रारणोद्यमनाः शुभाशुभकार्यनिष्क्रियमश
रीरं वा वसंतं न प्रियाप्रिये स्पृशत इति बह्वृश्रुते

त्रि
३८

38

रशरीरस्यव्राह्मरणोतः करणादिधर्मारणामसं
भवात्ताभ्यांनिर्मुक्तासंगेत्यर्थः विमुक्तस्यविमुच्य
ते इतिश्रुतेः ॐहानोपादाननिर्मुक्तायैनः १४
हर्षिरणी पक्षपवानंदयतीतिश्रुतेः हर्षयति
संतोषयती तथा ॐहर्षिरण्यै० १५ हरिसोदरी
हरिरणाकृष्णेनसमानमेकमुदरं उत ईषत्
अरंभेकमेवच्छेदकमित्यर्थः उतञ्चैरस्ंकप
टंवा असत्यमिथ्याभूतमायोपाधिकश्चैतन्या
वस्थाःविशेषरूपा अपरेयमितस्त्वन्यांप्रकृतिं
विद्धिमेपरां जीवभूतांमहाबाहोययेदंधार्य
तेजगत् इति देवात्मशक्तिंस्वगुणैर्निगूढा
मित्यादिश्रुतिस्मृतिभ्यामीश्वरस्यरूपभेदता
वगमादिति मंतव्यं ॐहरिसोदर्यै० १६ हाहा
हूहूमुखस्तुत्या हाहाहूहूरिति नामवन्तौ
गंधर्वौमुख्यौ येषांजनानांतेतथातैः
स्तुत्यागुणिनिष्ठगुणाभिधानंस्तुतिस्तदा
श्रयत्वेनप्रतिपादनीयेत्यर्थः ॥
ॐहाहाहूहूमुखस्तुत्यायैनमः ॥ १७ ॥

ह्रानिवृद्धिविवर्जिता अवयवोपचयरूपावृद्धिस्त
दपचयरूपाह्रानिस्ताभ्यांविवर्जिता नवर्धतेक
मेणनोकनीयानितिश्रुतेरुपलक्षणं षड्
भावविकाराणांशरीरधर्मत्वेनकर्मनिमित्त
त्वादीश्वरेतरभावेननिर्विकारेत्यर्थः ॐ ह्रानि
वृद्धिविवर्जितायै. ८९ हैयंगवीनहृदया हैयं
गवीनवन्नवनीतसदृशा विरलमृद्ववयवपरि
णामइवतत्सादृश्यपयोरिहृदयकृपारसरूपप
रिणामवतीति सा तथा हृदयाभावेपि सर्वा
त्मकतया तद्धर्मीलक्षणादिवत्मायापरिण
मरूपादयावाहृदयशब्देनोच्यते अवागमन
इतिश्रुत्यासर्वनिषेधात् ॐ हैयंगवीनहृदया
यै. ९० हरिकोपारुणांशुका हरिकोपइंद्रको
पश्राद्रीमहावततद्वेवर्षासूद्भवोष्टपादोरक्तव
र्णोमहंगः कीटविशेषस्तथाशोणमंशुक
मेवं स्वार्थेकप्रत्यये किरणानिवायस्याः सा
तथा ॐ हरिकोपारुणांशुकायै. २ इतिश्री
त्रिशतीनामार्थप्रकाशिकायां द्वितीयखंड

त्रि
३९

चतुर्थवर्णनामार्थप्रकाशनेनवमंप्रकरणं
लकाराख्या लकारयुक्तमूलमंत्रआख्यावाचक
शब्दोयस्याःसातया लकारस्यशक्तिबीजस्यवा
र्थः सेंद्रियश्रुतिश्रुतेः लकारयुक्तस्यमायाबीज
जस्यवाग्लवेमायेत्यर्थः ॐलकाराख्यायैनमः
लताहृज्या लमन्तिविनमंतिश्रयंतेनश्राभवं
तीतिलताः परमपतिव्रताअरुंधत्यादियोषा
स्ताभिः स्थिरमांगल्यायस्वेष्टदेवतात्वेनहृज्या
हृजनीया तदुक्तं समाराध्यमहेशानीभुक्तिं
मुक्तिंचविन्दति अथवा केदारादिगौरीविशे
षभूतैर्लताभिरुपलक्षणं वन्यएज्योपकर
णैः हृज्यालंकृतशावरीवावनदुर्गेतिवेतिभा
वः ॐलताहृज्यायै० २ लयस्थित्युद्भवेश्वरी वे
परीत्येनविशेषणंयोज्यं उद्भवस्थितिलयः का
र्यात्मनाभिव्यक्तिः स्थितिर्ज्ञानविषयतायोग्य
कालावच्छेदस्तदनुभवहेतुमन्याकवमितियाव
त् प्रलयउत्पन्नकार्यस्यकारणात्मनावस्थितिः
वाचारंभणायोगपतेत्यर्थः ॥

तासां क्रियाणामचेतनकार्यत्वायोगेन घटा
दिकार्ये चेतनस्य निमित्ततादर्शनात् एक
तटस्थेश्वरत्वं गोपुरादौ नानाचेतनदर्शना
न्नानेशानानेश्वरत्वं वेति विषये यतो वा इमा
नि भूतानीति श्रुतौ यत इत्येकवचनं पंच
म्या नानात्वतटस्थत्वे कर्तृः कृतिरिति सूत्रे
जनिकर्तुः कार्यस्य प्रकृतिः प्रकृतिरुपादा
नमपादानसंज्ञकं स्यात् अपादाने पंचमी
ति शासनात् अभिन्ननिमित्तोपादानत्वं
मीश्वरत्वमिति सिद्धान्तः तटस्थलक्षणमे
तज्जायमानस्य ब्रह्मणो लक्षणं प्रमाणयो
रेवमप्यवाच्यत्वादित्यभिप्रायः आदौ लयश
ब्दोपादानेनानादित्वं प्रपंचस्य सूचितं जगदि
ति प्राहसूत्रेण नाम प्रयोजनीयं तथा च
जगतो लयश्च स्थितिश्चोद्भवश्चेते यामीश्व
री कूटस्थचैतन्यमात्रेण सच्चिदानंदात्मा
यकतया विवर्तकारणमित्यर्थः ॥ लय
स्थितिमुद्भवं चार्थैः ॥ २ ॥ लास्यदर्शनसंतुष्ट

यथाराज्ञासंस्पर्शकामः प्रयोजनमन्तरेणा
पिमृगयादिलीलाविशेषान्पश्यति वालका
दिन्संवा तथा प्रज्ञानिनाऽदृष्टानिष्टमिश्रो
दासीनपदार्थं च दृष्ट्वा यानुभवजन्यहर्षशो·
कादिसंभवमहोद्रेकशोकातिरेकहेतुकवि
हितादिकरणाकरणरूपचरणघंगपरि
घंदद्रूपनानाविधप्राणिकायनिकायजन्य·
लास्यस्यदर्शनेनान्तरेणापि प्रयोजनं संतु·
ष्टः तत्तत्कर्मानुसारेण फलप्रापकेश्वरतया
सर्वसमानत्वात् नादत्तेकस्यचित्पापं न चैव
सुकृतं विभुरिति भगवद्वचनात् लास्यं देव
तादिवारवनितादिभिः क्रियमाणताल·
गीतनृत्कंदंर्पतस्यदर्शनेन संतुष्टः तदीय
फलप्रदानोन्मुखकृपारसवनीत्यर्थः ॐ·
लास्यदर्शनसंतुष्टायै· ॥ लाभालाभविवर्जि
ता प्राप्तस्याप्राप्तिर्लाभः कृतेपि यत्नेतद
प्राप्तिरलाभस्ताभ्यां वर्जिता पर्याप्तकामत्वेन
नित्यतृप्तत्वात् ॥

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचनेति भग
वद्वचनात् ॥ ॐ लाभालाभविवर्जितायै नमः ५
लेख्येन राज्ञा इतरेषां जीवभ्रांतिकल्पितानां
गुणमूर्त्यादीनामुपासनाविधिरूपा वा कर्म
विधिरूपा वा आज्ञा प्रेरणा तस्यामविषयीकृ
तामाययासा तथा शुद्धचैतन्यस्य विशिष्टक्रि
याद्यात्मकत्वाभावेन विध्यविषयत्वादिति
यावत् ॥ अथवा किंकरत्वाभावेन तेषां देवाना
माज्ञाप्रेरणा लेख्योपेक्षणीया यया सा सर्व
स्याधिपतिः सर्वेशान इति श्रुतेः ईश्वरस्य स
र्वनियंतृत्वेन स्वेनरनियम्यत्वादिति ज्ञातव्यं
ॐ लेख्येनराज्ञायै न॰ ६ लावण्यशालिनी ला
वण्यं सौंदर्यं परमानंदस्वरूपतयातिशायि
तमीति विषयत्वं शालत इति तथा सर्वावयव
साधारणसुन्दरभाववतीति वा ॐ लावण्य
शालिन्यै॰ ७ लघुसिद्धिदा लघुनोपायेन क्षि
प्रं वांछितार्थप्राप्तिं ददातीति वा लघुशब्दो
पलक्षणया लघिमापरः तथा च लघिमाघ

त्रि
५१

41

ह्यैश्वर्यप्रदेति वा यद्वा लब्धानामत्यन्ताल्पज्ञान
भाग्यशरीररूपचरणवतामप्यतिनिकृष्टानां
तिर्यगादीनामपि सिद्धिं भक्तियोग्यताहेतुज्ञा
नादिसाधनसंपत्तिस्वरूपकार्यमहिमातिशयः
तेषां ददातीति सा तथा ॐ लब्धसिद्धिदायै॰ ८
लाक्षारससवर्णाभा लाक्षारसेनालक्तक
द्रवेण समानो वर्णो यस्याः सा तथा आभा
शोभा कान्तिर्यस्याः सा तथा अतिपाटलवि
ग्रहप्रभेत्यर्थः ॐ लाक्षारससवर्णाभायै॰
लक्ष्मणाग्रजपूजिता अग्रे जायत इत्यग्रजो
रामभरतौ लक्ष्मणस्यापि ज्येष्ठभूतरामाचार
नुकारित्वेन चतुर्भिरपि दाशरथिभिः पूजि
तेत्यर्थः रामस्य शिवलिंगप्रतिष्ठानेति नाम
वत्वान्यथानुपपत्त्या शिवं प्रति पूजकत्वेन तद्दे
तेषां तद्धशास्त्रीं ज्ञरूपाणां नास्ति सिद्धिरिति ध
त्तिनोऽर्थः ॐ लक्ष्मणाग्रजपूजितायै नमः ९
लभ्येतरा लभ्यानि लब्धव्यानि कर्मोपासना
विशेषाणां फलत्वेन साध्यानि भव्यानीत्यर्थः

तेभ्य इतरविलक्षणानन्दं सत्यं स आत्मा नित्यो नित्या
नांचेतनश्चेतनानां एको बहूनां यो विदधाति
कामान् तमात्मस्थमित्यादि यस्मात्तादृपरो·
क्षाद्दृश्येत्यादिश्रुतिभ्य आत्मनो नित्यप्राप्तस्वरू
पत्वेन मोक्षत्वेन चतुर्विधक्रियाफलत्वाभावा
दिति मंतव्यं अथवा इतराणि धर्मार्थकामरू
पत्रिवर्गरूपाणि फलानि लब्धव्यानि प्राप्तव्या
नि यस्याः सकाशादिति सा तया ऽलंकृतेः
ऽंलभ्येतरार्थे· ॥ लब्धभक्तिसुलभा भक्तिः
सामान्यविशेषाकारेण द्वेधा तत्राद्या आर्तजि
ज्ञास्वर्थार्थ्यादिभिर्यैर्लब्धा तत्फलोद्देशेन स
मयविशेषे विछिद्यमाना तेषां सुलभा तत्र
त्साधार्थ्यानुसारेण फलदानोन्मुखेश्वरात्मरूपत
या सन्निहितत्वात् इतिया भक्तिस्तु ब्रह्मसाक्षा
त्कारमात्रपुरुषार्थैकभक्तितया लब्धा एकभक्ति
र्विशिष्यते इति स्मृतेस्तस्य सुलभा स्वात्मरूप
तया सदा ज्ञायमानत्वात् ज्ञानी त्वात्मैव मे मत
मिति गीतासु अथवा लब्धा प्राप्ता सत्यपि

त्रि
४२
42

कंठगतचामीकरवलयभक्तीनां सुलभा सुखे
नानायासेन कष्टं विना प्रसाध्यतया लाभः प्राप्ति
र्यस्याः सा तथा भक्तानामभिज्ञानानीति सूत्रेः
ॐ लब्धभक्तिसुलभायै॰ १२ लांगलायुधा शि
ष्यरूपतया हलायुधेत्यर्थः अनेन तस्यास्मिना
गानामिति भगवदुक्तेः ॐ लांगलायुधायै॰ १३
लग्नचामरहस्त श्रीशारदापरिवीजिता लग्नौ
करसंबद्धौ धृतावित्यर्थः लग्ने चामरे ययोस्तौ ता
दृशौ हस्तौ ययोस्ते श्री श्रमहालक्ष्मीशारदाच
नेनथाभूतेचताभ्यां परिवीजिता अनादिका
लादारभ्य परिचर्याय वीज्यमानेत्यर्थः ॐ लग्न
चामरहस्तश्रीशारदापरिवीजितायै नमः १४
लज्जापदसमाराध्या लज्जा नामांतःकरणध
र्मः जुगुप्साहेतुर्गूफनसाथनं उपलक्षणम्
मनोधर्माणां तस्य पदमाश्रयः कामः संक
ल्पो विचिकित्सा श्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरि
त्येतत्सर्वं मन एवेति श्रुतेः तस्मिन्समाराध्या
चिंतनीयेत्यर्थः ॥

यग्रात्मनि तिष्ठन्तं रोयमयति गुहाहितं गह्वरेष्ठं
तमात्मस्थं येऽनुपश्यन्ति धीरा इत्यादि श्रुतिभ्यः
अथवा लज्जापदं ह्रीं वाचकं तस्मिन्नधिष्ठानत्वा
भिव्यक्तिहेतुस्तत्स्वबहिर्योगक्रमेण सृजनीये
त्यर्थः ॥ लज्जापदसमाराध्यायै ॥ ११ ॥ लंपटा
लमिति पृथ्वीवाचकं बीजेन तद्रूपलांछितं जग
ल्लसते आवरकत्वेय मंवनया अविद्यात्तस
ते तमोजगतः पटः कारणीभूताविद्या यस्याः
सा तथा मायिनं तं महेश्वरं पकोजालवानि
त्यादि श्रुतेः अज्ञानेनावृतं ज्ञानमिति स्मृतेश्च
अथवा लंपटो नाम तन्त्री आलस्यकर्मोपास
नाबाऊल्पेपि प्रतिबंधकभूयस्त्वेनत्वेशीघ्रत
या परमेश्वरस्य फलदानोत्सुखतायां राजा
दिव विरविलंवितसेवाफलदानवैरव्येतहृः
तोपचारो लंपटो यस्याः सा तथा अथवा लंप
टो नामांगः करणाथर्मारणमध्यासवशेनत
न्नेर चिन्नैव तन्मे सन्नवरज स्त्रमकर्मणाञ्जपलथे
लहवं ॥ लंपटायै ॥ १६ ॥ नकुलेश्वरीकः पृथि

त्रि
५३
43

सुपलक्षितं जगल्लीयतेस्मिन्निति जलं मायोपा
धिकचैतन्यं जगत्प्रलयाधिष्ठानं यत्प्रलयेऽस्य
भिसंविशन्तीति श्रुतेः लीयमाने जले लज
लेनिरुपाधिकमित्यर्थः तत्र साईश्वरी च सा
तथा लजलेस्थानविशेषः स्वाधिष्ठाने माणि·
पूरकं वा तस्येश्वरी विष्णुरुद्रात्मिकेत्यर्थः
भूतसृष्टिश्रुतौ पृथिव्या उदकेन तस्य तेजसि
तस्य परमात्मनि लयश्रवणात् सदायतः
नाः सुप्रतिष्ठा इति विभूतिविशेषो वा गैलज
लेष्वर्थे· ७ लभ्यमाना सर्वैः प्राणिभिर्लभ्यो
मानोऽथ तस्याहंकारोऽभिमानात्मकस्तद्धंका
रः प्रकीर्तित इति स्मरणात् अध्यासेनाहं
काराधिष्ठानेत्यर्थः अथवा मानस्तूज्ञायामि
तिस्मरणात् यैर्यैः प्राणिभिर्विघैश्वर्यज
लसौंदर्यातिशयादिवशात्सूज्ञा लभ्यते सु
खहेतुस्यानन्दं तयोभिरणा एवमेव लभ्या सृ
ज्ञादिजन्यापकारस्य सुखादेः सुखरूपतया
लभ्यत्वात् यद्वा मानः अणिमलघीयैर्श्वरभेद
नप्रसिद्धः सर्वापथमहानजआत्माहं महान्प्रभुर्वै
पुरुषः

अणोरणीयान्महतोमहीयानित्यादिवाक्यैर्ज
लस्सूर्यादिवदुपाधिधर्माणामुपहिते मजस्ले
बमत्कुणसर्पादौप्रतीयमानत्वात् तथ्योमा
नःपरिमाणउपहिततयाजगतोययासातथा
ॐतथ्यमानायै॰ ९ तथ्यरसा रसोवैसइति
श्रुतेः रसवद्रूपतेसेवध्यते इतिव्युत्पत्त्याप्री
तिविषयआनंदः सत्त्वस्वरूपत्वेनतथ्योयया॰
सा शृंगाररसोवातद्व्यंजकमंगलाभरणभूषा
लंकारवत्वादितिभावः शुद्धसत्त्वप्रधानमायो
पाधिकतया रस्याःस्निग्धाःस्थिराहृद्याआहा
राःसात्विकप्रियाइति गीतोक्तेः नैवेद्यादौक
टुम्ललवणादीनांदेवादिविषयेनिषिद्धत्वाच्च
प्रीतिविषयत्वेनमधुररसोतथ्योययासाइति
वा तथा ॐतथ्यरसायै॰ १९ तथ्यसंपत्समुन्न
तिः तथ्यास्वरूपतयास्वतःसिद्धायाःसंपदस
त्यकामत्वादयःसच्चिदानंदाद्यावाताभिःस
मुन्नतिःसर्वोत्कृष्टतायस्याःसेति तथा ब्रह्मणा
मायामात्रोपाधितयाभिव्यज्यमानागुणाःक

मीत्युद्भूतत्वादनाकारिकाः संतः सर्वोत्कृष्टभावे
ब्रह्मण्येपरत्यापर्यंति तमीश्वराणां परमं महेश्व
रं तं देवतानां परमं च दैवतं पतिं पतीनां परमं
परस्ताद्विदाम देवं भुवनेशमीड्यं सत्यकामः
सत्यसंकल्पः एष सर्वेश्वर एष सर्वेशः सूर्यो
तर्याभिएषयोनिः सर्वस्येति गतिर्भर्ता प्रभुः
साक्षीत्यादिश्रुतिस्मृतिभ्यः एष नित्यो महि
मा ब्राह्मणस्येति श्रुतिसिद्ध नित्योत्कर्षत्वं
ब्रह्मस्वरूपमेवेति नात्र विचारणीयं किंचिद
स्तीत्यभिप्रायः ॐ त्वयि संपत्स्यमानतये नः २०
इति श्रीत्रिशतीनामार्थप्र० द्वितीयखंडे पंच
मवर्णनामार्थप्रकाशानंदशामं प्रकरणं १०
ह्रींकारिणी ह्रींकारो द्वितीयखंडसमाप्य
वयवतया वाच्यवाचकसंबंधेन यस्यास्त्र
स्तीति सा तथा ॐ ह्रींकारिण्ये नमः १
ह्रींकाराधा अत्र ह्रींकारशब्देन तत्कार्यभूता
वेदास्तेषामध्यर्थतया वा आधाराधेयभावा
पूर्वभावी त्यर्थः शब्दस्यार्थविषयकत्वेन प्र

वृत्तेः शक्तिग्रहादौकाव्यादिकत्वावार्थत्तान
पूर्वकशब्दसंयोगदर्शनादर्थस्यपूर्वभावित्व
मुक्तमितिभावः गें क्लीकाराद्यायेन· २ क्ली
मथवा अस्यवीजस्यजगदभिन्ननिमित्तोपा
दानभूतमायाविशिष्टचैतन्यवाचकतया·
तत्प्रतीयकत्वेनतन्निष्ठयावद्गुणवत्त्वं तदुपा
सनामहिम्नाभिव्यज्यते अन्यथा मंत्रप्रस्य
र्थयास्तेष्टसिद्धिभावप्रसंगःस्यात् अव्यव
हितपूर्वनाम्नानभिव्यक्तरूपस्यापिशब्दतत्त्व
स्य एतद्वीजमात्रात्मनोच्चारितवीजार्थकत
यापूर्वभावित्वमुक्तं इदानीमभिव्यक्तात्म
स्वार्थकत्वविवर्तवादमाश्रित्यवाचारंभण
कारेणनामरूपद्वयवत्वमुच्यते क्लींवीजा
र्पीसेनशब्देनलक्ष्यते मध्येव्यवहारकाले
क्लीयस्यास्मातथा घटादिष्ववस्तुप्रसक्विदा
नंदप्रतीत्या व्यवहारकालेपिप्रपंचकारण
ब्रह्मानुस्यूततयाभासमानेनजगत्कारणं इ
तिसिद्धांतः अनेनाचेतनपरिणामारंभादि

त्रि
४५

वादातिप्रमाणतयापुनराचाराभासवत्वेननिरस्ता
वेदितव्याः ॐ ह्रीं मध्यायै ॥ ३ ह्रीं शिखामणिः
लोकेयथाचूडामणिः सर्वांगरचिताभरणापे
क्षयातद्विजातीयप्रकाशासत्ताधाश्रयत्वात् उ
त्तमांगस्थानविशेषस्थापितः महदैश्वर्यादित
द्धतपुरुषसत्तापयति तथासर्वशाब्दजालतद
र्थार्थभूतचिज्जडसंबंधिरूपप्रपंचवाचकातिः
स्तस्मह्रींवर्णात्मकश्रीविद्याराजवीजस्यसत्वज्ञा
नानंतानेदात्मकलस्यार्थभूतासतीह्रींवीजज्ञा
पकानांसर्वार्थप्रदानेनपारमैश्वर्यंव्यंजयती
तिशुणयोगकृतनामेदं तथाच ह्रीं शिखामणि
परमतात्पर्यगाज्ञापनीयेत्यर्थः ॐ ह्रीं शिखाम
णये ॥ ४ ह्रींकारॐडाग्निशिखा ह्रींकारएव
ॐ उवाच्यवाचकभावसंबंधेनपरब्रह्मावच्छेद
कतयाश्रावहनीयादिसदृशं तस्याग्निशिखा
उद्दीप्ताग्नौजुहोतीतिप्रमाणेनाहवनीयेजुहो
तीति विधिवाक्यगतहोमाधारतांकेवलाहवनी
यस्यायोग्यतयासाग्निज्वालस्यतस्यहोमाधारता

मोयज्ञायमानायायदृष्टद्वारास्वर्गसंबंधेनसामः
र्थ्यकतयातज्ज्ञापकवेदवाक्यस्यापिपुरुषार्थसं
बंधित्वमाह वनीयनिष्टहोमाधिकरणदीप्ताग्नि
ज्वालास्वाधारभूतकुंडमार्थकसंपादकंवाभव
ति तथा स्ववाचकबीजस्यापिमंत्रैरुपासितेति
विधिगतदेवतोपासनकरणानांमंत्राणामपि
स्ववाचकतयामार्थकसंपादनात्तथोच्यते ॐह्रीं
कारकुंडाग्निशिखायै॰ ५ ह्रींकारशशिचंद्रिका
ह्रींकारपवशशीचंद्रस्तस्यस्वरूपाभेदभूतप्रका
शावैतस्यचंद्रिकापदेसोपमीयते यथा चंद्रस्व
रूपभूतास्ततप्रसारभूताज्योत्स्नादेवादिसर्वलो
कानांसंजीवकतयोपकरोति तथा दृढतरभ
क्तिपरवशपुरुषधौरेयादीनांह्रींकारवाच्यार्थ
तयातदभिन्नत्वेपिजगद्विवर्तकारणयासच्चिदा
नंदात्मायकतयासंजीवयतीतिभावः ॐह्रींका
रशशिचंद्रिकायै॰ ६ ह्रींकारभास्कररुचिः
भासंक्रान्तिंकरोतिप्रसारयति लोकोपकारा
यतिसूर्यस्तस्यरुचिः प्रचंडभानुर्यथालोके॰

त्रि
वि
५६

सूर्योवर्षास्वतिगाफतरस्तवङ्डकथारासंख्या
मदिगन्तरास्तदिवाविद्यमानोपिसूर्यः साक्षा
देवमितिचाक्षुषगोचरोनभवति तदभावेशि
ष्टानांभोजनादि संजीवकव्यवहाराभावेन त
द्रूपायासिद्धाप्रसन्नमनसोभवंति तथाज्ञान
मार्गानधिकारिणांमोक्षमार्गोपायभूताविद्ध
तदेवतारूपह्रींकारणांजनानांबहुतरजुण्य
मार्हिम्नामहावातेनमोहाबलोदूरीकृतायाथ
भाद्दिवसस्वेसाथनंगुरुकृपायांगावलोक
नरूपदीप्तावशेनप्रतिबंधकडवितापगमे
परदेवतारूपोह्रींकारः शरस्वर्यासाक्षाद्दृ
श्यार्थेपरोलज्ञानहेतुर्भवति चिरकालेनेयं
तर्यभावनाप्रकर्षेणतस्मिन्नभिमुखेसति त
ल्लत्याद्रूपपरमानंदचित्कलास्वयमेवाभिव्य
क्तासत्यानंदानुभावेनस्वखयतीति तथाव्याते
गेह्रींकाराभास्कररूप्यैनमः ७ ह्रींकारांभो
दचंचला श्रंभांस्यमस्तानिददातीत्यंभोदा
ह्रींकारस्यापिकामवर्षत्वेनतेरुपमीयतेतेष

वेचला विद्युल्लता विद्यमाना तदभिन्ना प्रकाशमा
नासती वर्षोदकहारा सस्याद्युत्पादकत्वं यथा
वक्ति ह्रींकारवाच्यतया तदभिन्नापि तत्स्वरूपवि
चारणायां मुहुस्तस्यार्थस्य रूपास्तत्वापि निर्वचनी
यत्ववाचकमंत्रप्रकाशितदेवतात्वेन स्वाभीष्टपु
रुषार्थप्राप्तिहेतुभूतेत्यभिसंधिः ॐ ह्रींकारांभो
दंचंचलायै ८ ह्रींकारकंदांकुरिता ह्रींकारएव
कंदः पृथुतरबीजभावस्तस्यांकुरितप्रादिप्रस
वोन्नतनाभिव्यक्तिरित्यर्थः यथा लोकेप्यंकुराद्
कंकंदादिनिष्ठोत्पादकशक्तिमभिश्रयैवस्वयंस्क
दशाखापत्रपुष्पफलाद्यात्मना यथाविवर्तमा
नेनतत्सामर्थ्यप्रकटनकारणं भवति तथा ह्रीं
कारस्य वेदैकदेशत्वेनेतरप्रमाणानपेक्षतया
स्ववाच्यार्थज्ञापनेन स्वतः प्रामाण्ये स्थितेपि त
जन्यज्ञानविषयतावच्छेदकधर्मरूपनानाप्रका
रजनतानत्परिणामहेतुत्वसाधिकाघटनघटना
पटीयसी मायोपाधिकत्वेन तदर्थहृदयरूपास
तीतन्मात्रप्रमाणवेद्येत्यर्थः ॐ ह्रींकारकंदांकु

त्रि
प०

त्रितायै. ९ ह्रींकारैकपरायणा ह्रींकारएवैकअति
तरसाधारणंचतद्विषयरूपार्थसाधकतयापरम
यनंज्ञापकंप्रमाणंयस्याःसातथा अस्यबीजस्य
वाच्यार्थेमायानिरधिष्ठानानसिध्यतीति तया
आश्रयत्वविषयत्वाभ्यां तद्रूपहितंतेनज्ञापितत्व
मितिभावः ॥ह्रींकारैकपरायणायै. ९ ह्रींकारदी
र्घिकाहंसी तद्रूपहितंतेनज्ञापितइतिभावः ॥
ह्रींकारैकपरायणायै. ९ ह्रींकारदीर्घिकाहंसी
ह्रींकारएवदीर्घिकाराजोद्यानक्रीडावापीसंसा
रकाननसंचारिलोकविश्रांतिकारणत्वेनह्रीं.
कारस्तयोपमीयते आरामस्यपर्यंपतिनतंपर्य
तिकस्मनेतिश्रुतेः आसमंताद्रमतेऽस्मिन्नित्याराः
मोवाजगत्‌ तत्रोपसनादिनापरमानन्दप्राप
कतयावाह्रींकारउपमीयतेतस्मिन् हंसस्पदी
हंसी यथालोकेसारासारविवेकीहंसाधारस्त्र
वर्णकमलादिमतीवापी मरालसंबंधिनीति
ज्ञायते तद्वद्वाच्यार्थरूपतयाप्रकाशमानासती
स्वसंबंधिजनस्यसत्वोत्पादकंमोक्षहेतुत्वंघोतय
तीत्यभिप्रायः ।

ॐ ह्रींकारदीर्घिकाहंसेनमः ॥ ह्रींकारोद्यानकेकिनी ह्रींकाररूपवोद्यानतत्फलानुभावकत्वात्तथोच्यते तस्यकेकिनीमयूरीयथालोकेबहुषुपादपेषुवारण्यकेषु सत्स्वपि तस्मादूपवनिर्भग्नासुतयादर्शनश्रवणादिजन्यप्रमोदसाधकत्वयोद्यानत्वंकरिष्यत्वंतथा ह्रींकाररूपदेवताधनि सच्चिदानंदरूपतत्त्वार्थस्य च परमपुरुषार्थसाधकत्वेन विशिष्टत्वस्यविषयरुद्राग्न्यादिमूर्तिषु प्रणवघानतरुवल्लीकल्पगुल्मादिवडनमनीचतापन्नदेवतिर्यग्ग्रन्थ्यादिषु च मयूरीवस्वेच्छया सर्वव्यापकत्वेन तदात्मरूपतयाशरीरेन्द्रियप्राणाद्याधारपरमप्रेमास्पदपरमानंदप्रत्यक्गोचरादंतर्गतिर्व्याततया एतद्बीजप्रकाशप्राभवतीत्यर्थः ॐ ह्रींकारोद्यानकेकिन्यैनमः १२ ह्रींकारारण्यहरिणी ह्रींकारवाच्यार्थैकदेशभूतमायाविघातककार्यीणवंधरूपतयागहनेव्याघ्रादीनामिवभयदेतत्रामसद्भावेनैवहुप्राप्तरूपधर्मसामान्येन ह्रींकारस्यारण्यपोपसितत्वंतथा

त्रि॰
४८

48

चारात्पमिवह्रींकारइति सर्वत्रोपमानोत्तरपद
समासः तत्रैवं सति यथारत्पगतपुरुषस्य शी॰
घ्रं दृष्टिपर्थ्यंगताहृदिगीपल्लीव्याघाघभावनि
श्वयेनतदधिष्ठानफलप्राप्तिसाधनतामवगमय
ति धीरपुरुषस्य तदानिरंतरभक्तिभजनपरप्रा
णिलोकस्योपासनापरिपाकमहिम्नापरोक्षी
कृतात्मज्ञाननिवृत्तिपूर्वकभयापाकरणेआनंदं
प्रापयतीति तथोपमीयतेइतिभावः तमेव
विदित्वातिमृत्युमेतीतिश्रुतेः ॐह्रींकाराऽ॰
एपहृदिगीपे॰ ९३ ह्रींकारबालवल्लरी ह्रींकार
मंत्रवाचकतानिरूपितवाच्यतानामकसंबंधा
वच्छिन्नपरदेवतास्वरूपत्वेन तदुपासनाविष
यफलदानसमर्थासतीप्रवालमात्रप्ररोहा
हिहृद्वल्ल्योपमीयते तथाच तत्संबंधितया
ह्रींकारोजपादिनाप्रबालइवसर्वदासंरक्षणी
यइतितात्पर्यार्थः परिनिष्पन्नइतियावत ह्रीं
काराबालवल्ल्यै॰ ९४ ह्रींकारपंजरशुकी मंदा
धिकारिणामप्युपासनाकरणं

साधारणापार्वतीप्रतीकतया ह्रींकारस्यबालका
दिलालनविषयत्वाधर्मपुरस्कारेणपंजरोपमा त
थाच तत्रत्यशुकीवसंलापादिनामंत्रध्यादिवि
नोदजनी एवंतत्तदनुष्ठानुसारेणफलदात्रीसती
तथोपमितेतिद्रष्टव्यं ह्रींकारपंजरमिवतस्यशु
कीतत्सार्थककारिणीत्यर्थः ॐह्रींकारपंजरशु
कैन॰ १५ ह्रींकारांगनदीपिका अंगनवत्सर्वसा
धारणविश्रान्तिस्थानतया ह्रींकारस्यतद्रूपमात
स्यदीपिका यथांगनारोपितदीपोवाह्याभ्यांतरव
स्तुजातंप्रकाशयंस्तत्रत्यलोकानामंधकारनिव
र्तनपूर्वकमभीष्टव्यवहारहेतुस्तथासर्वानुग्राहके
स्वयमर्पितैः संरक्ष्यते तथा ह्रींकारबीजार्थश्रव
णमनननिदिध्यासनेननिरंतराभ्यासादपरोक्षी
कृतस्स्वयंप्रकाशानंदरूपास्वसेवकान्सर्वोत्कर्षे
येन्नीति तद्रूपमितासती तथोच्यते ॐह्रींकारांग
नदीपिकायै॰ १६ ह्रींकारकंदरासिंही पर्वतशि
खराग्रवर्तीगुहाकंदरादरीत्यर्थः वेदमौलिपठि
तह्रींकारस्यग्राम्यविषयलिप्सप्राणिप्रवेशायो

त्रि
५८

रूपताविकलतयाकंदरोपमात्र यथा सिंही स्वेत
रत्तुइस्मगप्रवेशभयहेतुनखादिस्वव्याप्यविज्ञानभी
तानस्माः स्वाश्रयमात्रतावीरसुतत्परिसरनत्वेनि
वीतमुक्ताफलादिप्राप्तिंचनयति तदामेदभक्ति
तेंद्रीवुभुत्तादिकल्पषितपरिच्छिन्नाभिमानदेवतां
तराप्रतिपादकबीजतया स्वदेवतैकभावं कामि
तार्थे च प्रापयतीति सिंह्युपमासतीतथोच्यते ऐंह्री
कारकंदरासिंह्ये· ८ ऐंह्रींकारांभोजभृंगिका
ह्रींकारसुमनोमाध्वी ह्रींकारस्यवांछितफलप्रा
पकतया सुमनःसाहश्यं अथवा पुष्पाणिव्यव
हारसमयेबहुसावधानतयाव्यवहर्तव्यानि पर
मार्थाधिकारसत्वेनबहुमन्यमाना ह्रींकारउपा
सनावेलायांपरब्रह्मावच्छेदकत्वेनप्रपातसूर्वमे
कायमनसाध्यानव्यक्तिनियमसंपादनार्थपुष्पो
पमित्वमितिभावनीयं तथाच वाद्यादिनासुष्ठा
णिचपुष्पाणिनिर्मभुत्वेनफलानिजनयित्वाप
रिपतंति फलजनकशक्तेरभावेनतदितराणि
तत्सहत्वेन तज्जनकादि ।

१८

लोकेदृष्टानि पुष्परसस्य पृथिवीकारणभूतोद्
कतन्मात्रास्वरूपमधुररसात्मकत्वात्पुष्पाणां
फलजनकशक्तिस्तापको भवति तथा ह्रींबी
जस्यापि सर्वजनकताशक्त्याधायकतदधिष्ठा
नसच्चिदानंदपरब्रह्मस्वरूपा सती तन्मात्रयास्या
यथोक्तफलहेतुतया तदर्थरूपेण तद्वृत्तिर्भ
वतीति साधीसमानधर्मवत्त्वमस्या उपपाद्यत
इति विवेचनीयमितियावत् ऐंह्रींकारस्तुम
नो साध्येन: ४९ ह्रींकारतरुमंजरी फलार्थि
नः स्वानुष्ठानायतनादिभ्यः प्रतिबंधकेभ्य
स्तारयति पारं प्रापयति फललाभेन संतोष
यति भावः ह्रींकारस्य कल्पादितरुदृष्टांतीकृ
तः एतावता सेवादिप्रवृत्तिजनकत्वेन प्रागेवो
पशाखाग्रराजा पुष्पमंजरी फलकरणयोग्य
तां ज्ञापयतीति पुरुषार्थार्थिनामसंशयं प्रवर्त
कत्वेन प्रत्यक्षरूपा पि सती गुरूपदिष्टमंत्रदेव
वतात्मतया मंत्रोपासनायामभिमुखीकरणे
न पुरुषार्थान्प्रापयतीति मंजरीसादृश्यं प्र[illegible]स्यं

त्रि॰

परमदेवतायेति विवेचनीयं ॐ ह्रींकारतरुमञ्ज
र्यै नमः २ इति श्रीमत्परमहंसपरिव्राजकाचार्य-
त्रिशतीनामार्थप्रकाशिकायां द्वितीयखण्डे चरम
वर्णार्थप्रकाशनं नामैकादशप्रकरणम् ॥
सकाराख्या सकारशुक्लाश्रीविद्यानामकाख्या
वाचकशब्दो यस्याः सा तथा ॐ सकाराख्या
यै नमः १ समरसा समएकोरसोमधुरादि
रसादिवद्गुडपिण्डदीपकरूपेण कार्ये व्याप्य-
स्थितेत्यर्थः अथवा संस्कारदशायां सर्वत्र
त्वं किंचिद्भूतादिविशेषेण विभेदेन भिन्नरसा
द्भिन्नस्वभावे वर्तमानयोरीश्वरजीवयोर्वे
दान्तश्रवणादिनाजन्याखण्डाकारवृत्तिव्याप्त्या
स्याहं ब्रह्मास्मीत्यभेदानुभवदशायां एकरूप
तया सात्म्यं क्रियते इति सा तथोच्यते रसो
वै स इति श्रुतेः रसशब्दार्थः परब्रह्म समः
अभिन्नो यस्याः सा तथा तैत्तिरीयोपनि-
षत्प्रतिपाद्येत्यर्थः ॥

गेसमरसाये॰ २ सकलागमसंस्तुता आसमन्
ताद्गमयतीत्यागमः सकलपदार्थगोचरसवि
कल्पसमाजनकावेदा इत्यर्थः सकलैरनूनान
तिरेकेणेति हासगुरणादिसंहितायातदंगो
पांगरहस्यादियोगित्वंसकलशब्दार्थः तैःसंस्तु
ता सम्यक्स्तुतानातःपरंकिंचिदस्तीति निश्चय
पूर्वकगुणानिष्ठगुणाभिधानविषयतयातदु
पनीवकेत्यर्थः सर्वार्थप्रकाशकवेदनासंस्ता
वेनैवेदंपर्येणातदीयस्तुतिविषयतयाब्रह्मचे
तन्यात्मकतयामोक्षकारणीभूतज्ञानस्वरूप
त्वेनजिज्ञासेतिध्वनितोर्थः ॐसकलागमसं॰
स्तुतायै॰ ३ सर्ववेदांततात्पर्यभूमि वेदानां॰
मंताअवसानानि तत्त्वमस्यादिमतवाकानि
तेषांतात्पर्यंसमन्वयः समानाधिकरणमि
तियावत् तस्यभूमिर्विषयोज्ञाप्यमितियाव
त् उपक्रमेणासंहारावभ्यासोपूर्वताफलम्
अर्थवादोपपत्तीचलिंगंतात्पर्यनिर्णयेइति
वचनेनोक्ततात्पर्यानिर्णायकप्रमाबलेनाती

त्रि० इियथर्मोदिगोचरवाक्यवत्सर्वेषां वेदांतानामुपा
५१ सनाज्ञानविधिंविनाकर्माशेषतयाज्ञानतत्तापक
त्वेनशंसनावेदशास्त्रगाहूवाच्यानामहेतब्रह्मरू
णिगतिसामान्येनकर्मोपासनाकांडद्वयार्थो
पकारित्वेनमोक्षहेतुज्ञानजनकत्वेनपर्यवसा
नमितितात्पर्यविषयविषयता ग्रंथेऽचैतत्य
स्येतिसिद्धांतार्थइत्यभिसंधिरिति सामानाधि
करण्यंचविशेषणविशेष्यतालक्ष्यलक्षणा०
भावश्चपदार्थप्रत्यगात्मनामितिन्यायेनसंबं
धत्रयेणाखंडार्थवेदांताबोधयन्तीति तत्तस
मन्वयादित्यधिकरणेप्रतिष्ठापितमस्माभिरि
त्यलंविस्तरेण सर्ववेदांततात्पर्यभूमयेनमः ४
सदसदाश्रया अपरोक्षतयासन्निति विषय
तयाव्यवह्रियमाणं सत्कार्यरूपादिसत्तयाव्य
वहारिकसत्ताश्रयापृथिव्यमेजोभूतत्रितयसदि
त्युच्यते असत्सद्भिन्नतयापरोक्षज्ञानगोचरंवा
य्वाकाशादितत्कार्यरूपादिभिन्नगुणाश्रयमित्यु
च्यते ॥ इत्यसदित्यर्थः ॥

तयोरासयस्यपादानत्वेनतदधिष्ठानभूतेस्य

र्थः आरोपितस्याधिष्ठानसत्तातिरिक्तसत्ता

रिक्ततयासत्तास्फूर्तिप्रदत्वेनसर्वदातदनुस्यू

तेनिर्ध्येयं ॐसदसदाश्रयायै॰ ५ सकला आ

रोपितकलाभिरुपासनार्थंकल्पिताभिर्ज्ञा

वालिनासत्यकामंप्रत्युक्तषोडशकलायुक्त

पुरुषोपासनप्रतिपादकेछंदोगयवचनरी

त्याकलाशब्दिता वयवैःसहवर्ततेइतिसात

था चतुःषष्टिकलाभिःसहितावा अथवा

कलाशब्दोमुखादिकांतिवचनतयासहि

तेतिवार्थः ॐसकलायै॰ ६ सच्चिदानन्दा

सच्चासौचिच्चसच्चित् सच्चिच्चासौआनन्दश्च

कालत्रयबाध्यत्वंसत्वंसेतरप्रकाशाप्रका

श्यत्वंचित्वंपरमप्रेमास्पदत्वमानंदत्वंसत्यं

ज्ञानमनंतंविज्ञानमानन्दं सदेवसोम्येदम

ग्रआसीत् प्रज्ञाप्रतिष्ठाप्रज्ञानंब्रह्मआनंदो

ब्रह्मेतिव्यजनात् आनंदंब्रह्मणोविद्वान

त्रि
५२
52

विभेतिऊतश्चनेत्मादिश्रुतिभ्यस्तेस्वरूपंच
स्याःसातथोक्ता वेदांतशास्त्रोक्तब्रह्मस्वरू
पलक्षणलातितेत्यर्थः ॐसच्चिदानंदायै·
साध्या कर्मोपासनादिभिर्महावाक्यश्रव
णजन्यब्रह्मविद्यात्वेनसाधनचतुष्टयसंप
न्नाधिकारिणापरोक्षतयासाधितुंशक्यम
हाफलस्वरूपत्वादित्यर्थः साध्वीतिपाठः
साधोःस्त्रीसत्वगुणसंपद्यःसाधुःसकल
विद्यापारगतत्वेसतिसदाचारसंपन्नोदेवी
संपत्तिमानित्यर्थः तदेकनिष्ठापरमपति
व्रतासतीस्त्रीणांपातिव्रत्यसंप्रदायप्रवर्ति
केति यावत् ॐसाध्व्यैनमः ८ सद्गति
दायिनी सतीनांउत्तरावृत्तिरहितास्वर्गमा
त्ररूपागतिर्गम्यतेज्ञायतेप्राप्यतेइतिवागति
र्यत्ज्ञायतेतदेवगतिः तदन्यस्याज्ञानत्वात्कृ
तित्वानुपपत्तेःजातेफलेइच्छायांतत्साधनेषुपु
रुषःप्रवर्ततेनत्वज्ञानफलसाधनइत्यन्वयव्यति
रेकाभ्यां

ब्रह्मविदाप्नोति परं ब्रह्मवेद ब्रह्मैव भवति ये पूर्वं
देवा ऋषयश्च तद्विदुस्ते तन्मया अमृता वा बभूवु
रित्यादिश्रुतेश्च परदेवतास्वरूपमेव मुक्तिस्व
रूपतया सङ्गतिः तदावारकाज्ञानाभिभावेनैव
स्वरूपानन्दमभिव्यंजयतीति दायिनी अभेदेपि
गतिदानयोः कर्मकर्तृप्रयोग उपपद्यते तदा
त्मानं स्वयमकुरुत इत्यादिवदित्यर्थः सतीं सत्व
गुणप्रयुक्तां गतिं देवयानाख्यां सतां ज्ञानिनां
च गतिं ददातीति सा तथा ॐ सद्गतिदायिन्यै
सनकादिमुनिध्येया मननशीला मुनयः मन
नशब्देन लक्षणेन तत्साक्षात्कारवन्त इत्यर्थः ब्र
ह्मणो मानसिका पुत्रा ज्ञानवैराग्यादिबहुला
मोक्षमार्गप्रवर्तकाः सनकआदि येषां ते मुन
यः सनन्दनसनातनसनत्कुमारप्रमुखा निरी
षणा निश्चिंतास्तैर्ध्येया अनादेरणस्वात्माभेद
ध्यानेन सर्वदा विषयीकृतेत्यर्थः त्वं वा अहम
स्मि भगवो देवते अहं वै त्वमसि ये त्वं चापि
मां विद्धि आत्मानं चेद्विजानीयादयमस्मीति पू

त्रि·
५२
53

रुषः अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्यो
ऽहमस्मि इति न स वेद यथा पशुः मृत्योः स मृत्यु
माप्नोति य इह नानेव पश्यति इत्यादिश्रुतिस्मृ
तिशतेभ्यः ॐ सनकादिमुनिध्येयायै नमः ८
सदाशिवकुटुम्बिनी सदाशिवः कुटुम्बमस्या अ
स्तीति तथा ॐ सदाशिवकुटुम्बिन्यै ११ सकला
धिष्ठानरूपा अथात आदेशो नेति नेति नेह नाना
स्ति किंचनेत्यादिश्रुत्याभिरप्रतिपन्ना सर्वं खल्वि
दं ब्रह्मेत्यादिवाक्यानां सामानाधिकरण्यमवग
म्यते कार्यस्य कारणाभेदज्ञानं वाधाय तद्भिन्नता
ज्ञानस्य भ्रमरूपत्वात् तथा च श्रुतिनिषेधस्याऽवि
ध्यपेतया श्रुत्यादीनामपि तत्त्वज्ञाने निवृत्तौ
भूतपूर्वगत्या सर्वाधिष्ठानत्वेनानुभूयत इति भा
वः ॐ सकलाधिष्ठानरूपायै १२ सत्यरूपा स
त्यं ज्ञानमनन्तमपरिच्छिन्नव्यावृत्तं सच्चिदानन्दरूपं
यस्याः सा तथा परिणामवादमाश्रित्य सदुपरो
तज्ज्ञानयोग्यानिष्टथिव्यञ्जेनोक्तिरूपेण तदपरोक्ष
ज्ञानविषयनित्यात्ममयमित्यर्थः सत्त्वमस्याभ
वदित्यादिश्रुतेः

सत्यं स्वरूपं यस्याः सा तथा ॥ ॐ सत्यस्वरूपायै ॥ १३ ॥ स
माकृतिः समा अभिन्ना सच्चिदानंदस्वरूपेकरस
स्याकृतिर्मूर्तिः स्वरूपं यस्याः सा तथा यथा शा
स्त्रप्रमाणं मूर्तिर्विग्रहो यस्याः सेति वा समास
दाशिवेन शरणसौंदर्यबलवीर्ययशोगांभीर्य
गितादिपरिज्ञानसर्वज्ञत्वादिबहुलधर्मविशेषे
मूर्तिर्यस्याः सेति वा चतुर्विधभूतग्रामेषु तत्तत्सा
रव्यानुसारेण समा तत्र तत्र निवासयोग्या मूर्ति
र्यस्याः सेति वा कर्माध्यक्षतया तत्तत्फलविशे
षदानेषु समा पक्षपातरहिता मूर्तिर्यस्याः सा स
मः सर्वेषु भूतेषु मद्भक्तिं लभते परा मित्युक्तमा
त्रः पुरुषो नराणां सदा जनानां हृदये सन्निविष्ट
इति श्रुतिस्मृतिभ्यामेकरूप्यावगम्यादित्याश
यः ॐ समाकृतये ॥ १४ ॥ सर्वप्रपंचनिर्मात्री सं
सारस्यानादितया प्रामो तस्याथितेन च भूत
भविष्यद्वर्तमानगत्या सर्वेषां स्वं व्याप्तं प्रपंचस्य
प्रपंच्यते विस्तार्यते विवर्तत इति प्रपंचः एके
वीजं बहु यायः करोमीति श्रुतेस्तस्य निर्मात्री

त्रि
५५

निर्माणमभिव्यक्तिस्तन्निमित्तं तथा तत्कार्यैस्त्वमु
पचर्यते देवदत्तः पचतीतिवत् ॐ सर्वप्रपंचनि
र्मात्रे ० ५५ समानाधिकवर्जिता कुलशीलजाति
गुणादिभिस्तुल्यः समस्तैः श्रेयानधिकस्तैर्वर्जि
तान तस्य प्रतिभास्ति विद्याधिको रुद्रो महर्षिरिति
श्रुतेः सर्वाधिपत्यं कुरुते महात्मेति एकमेवाद्वि
तीयं नतत्समो स्त्यभ्यधिकः कुतो न्य इति श्रुति
स्मृतिभ्यां चेति भावः एतद्द्वयासमानीयः समा
नप्रजनीयो धीरस्तद्द्वयेन वर्जिता एकमेवाद्वि
तीयमित्यादिश्रुतिरितिवार्थः ॐ समानाधि
कवर्जिताये ० ५६ सर्वान्हंगा कार्यापेतया कार
णस्याधिकत्वात् सर्वापेतयोन्नुगोन्नता पादो
स्याविश्वाभूतानि त्रिपादस्यामृतं दिवीति श्रुतेः
ॐ सर्वोत्तुंगाये ० ५७ संगहीना निरवयवत्वेन नि
ष्कारणत्वेन वा निराश्रयत्वेन वा नित्यशुद्धमुक्त
स्वरूपत्वेन संबंधरहिता वा असंगो न हि सज्जते
नचास्य कश्चिज्जनिता न चाधिप इत्यादि श्रुतेरित्य
नुभावः ॥ ॐ संगहीनायै नमः ५८

सगुणा समापकश्रका रागुणाःसत्यकामादयो यस्याःसा तथा गुणी सर्वविधः सत्यकामःसत्य संकल्प इत्यादिश्रुतेः त्रिमूर्तित्रूपतयासत्वरज स्तमोगुणैः सह वर्तते इतिवातथा ॐ सगुणा यै० ११ सकलेष्टदा इष्टा विषयभूतानीष्टानि० काम्यानीत्यर्थः सकलानि च तानि इत्यभेदस मासः अन्यथाजीवादिवत्कस्मिंश्चिद्विषयेश सामर्थ्याशंका स्यात् एकस्य पदार्थस्य बहूना मिष्टाविषयत्वदर्शनात् एकश्रकामनायाम पिसत्त्वहद्भावितेन सर्वव्यापकस्योत्तमा परदेव तायाबहुफलप्रदानत्वेनात्यंत विश्वसनीयता यामतिशायप्रतिभानं चेत्यर्थः अथवा परि च्छिन्नपरिमितभाग्यवत्प्राणिजातस्य सर्वस्य स र्वेच्छायामपियानि सर्वाणि स्वबुद्ध्याशक्यानि शेषेनेष्टान्यपेक्ष्यानि वांछितानि तान्येव प्रयच्छ ति ददाति नतदधिकानि लोकइच्छाया बहुप्र कारत्वेन दुःपूरणीयत्वादिति भावः सर्वेषां प्रा णिनामिष्टाइज्यया पूजया विषयीकृता यत्नेन

त्रि॰ वासमाराधकस्य फलप्रदेत्यर्थः अहंहि सर्वय
५५ ज्ञानांभोक्ताच प्रभुरेवच यष्टस्वैव साधुकर्मकार
यति तंयमेभ्यो लोकेभ्य उन्निनीषत इति श्रुति
स्मृतिभ्यां परमेश्वरार्पणबुद्ध्या क्रियमाणस्यैव
कर्मणः शुभफलत्वादिमुक्तत्वेन काम्यकलार्था
नांजन्ममरणादिवंधकत्वेन स्वल्पतया अनाद
रणीयत्वादित्यर्थः अथवा कलाभिरवयवैरल्प
त्वमभावैरित्यर्थः तैः सहितानि फलानि मनु
ष्यानंदादिब्रह्मानंदांतानि फलानि आनंदस्व
रूपाणि ददातीति तया ॐ सकलेष्टदायै नमः २॰
इति श्रीत्रिशतीना॰ तृतीयखंडस्य प्रथमवर्ण
नामार्थप्रकाशनं॰ ९१ ककारिणी त्रिखं
डस्थितीयवर्णरूपा ककारावयवो वाचको अस्या
अस्तीति तया ॐ ककारिण्यै॰ १ काव्यलोला
वाल्मीकिवेदव्यासादिकृतेषु काव्येषु लोला
चापलत्वार्थभेदेन तत्र संबद्धेत्यर्थः ॥
अथवा कविभिः कालिदासादिभिः कृतेषु
स्तुतिविशेषेषु अलंकाररसादिमिश्रित.

सौन्दर्यलहरीप्रभृत्येकुवाशीतिमतीत्यर्थः ११

ॐ काव्यलोलायैनमः २ कामेश्वरमनोह

रा कामेश्वरस्यमनोहरतीति तथा ॥

ॐ कामेश्वरमनोहरायैनमः ३ कामेश्वर

प्राणनाडी कामेश्वरस्यप्राणनाडी ययाना

ड्या: प्राणः संचरति सा तथा जीवनाडीत्यर्थः

इडयातबहिर्याति इति लयखंडवचनात्

लोके विश्वस्यमानेपशोर्हृदयपुंडरीकाकार

मांसखंडान्मिकांतः सुषिराष्टदलोपेतमष्ट

गुणपरिमासुषिरयुताधोभागकर्णिकायु

तेऽष्टपत्रे तस्यकर्णिकस्यकेसरायमाणाप

कशत नाडीनामंकुरास्तदष्टसेनसुरीतती

नामकनाडीसुषिरविनस्तमूलाभवन्ति सु

षुम्णानामकनाडी मूलाधारादारभ्यब्रह्मरं

ध्रपर्यंतंगतातस्यां षट् चक्राणि मूलाधारादी

दीनि तत्तन्मातृकावर्णसहितयोगशास्त्रो

क्तदलसंयुतानि सन्नद्धानिवर्तन्ते ॥

तस्या मूले पृथिवी देवता,

त्रि
५६

विसतंतन्तनीयसीकुंडलिनी अथोमुखावरण
शक्तिर्निद्राति तस्मादतिभागे इडानाडीभ्रूम
ध्यपर्यंतंप्रसृतावामेपिंगला तथाच आथदेव
स्यायांनेत्रयोर्दर्पत्यात्मनाऽस्ति प्रतिपादितः
स्वप्नेमनउपाधिकः सुषुप्तावज्ञानोपाधिकः
जाग्रतिस्थूलशरीराभिमानी विश्वइत्युच्यते स्व
प्नेसूक्ष्माभिमानीतैजसः सुषुप्तौकारणाभिमा
नीप्राज्ञः सुषुप्तिकारणात्मनास्थितानिस्थूलसू
क्ष्मशरीरजन्यभोगसाधनप्रारब्धकर्मवशेनसु
रीततीद्वारानाडीमार्गेणतत्सङ्गोलकान्याविशं
तीन्द्रियाणि तद्उपरमप्रारब्धोह्यथोहृद्गोलिका
यांविद्यमानोराजायटहान्तरसोपानमार्गद्वारा
प्रासादेविहृत्यतदवच्छिन्नांतःपुरपर्यंकेशया
नइवनाडीद्वारापुरीततीप्रविश्य तदवच्छिन्न
हृदयोपाधिकपरमात्मानं यदाप्रविशति तदा
सुषुप्तइत्युच्यते लिंगशरीरंकारणात्मनाली
यते तदाप्राणादिवायवः प्रलीनवृत्तयः सं
तप्राणः स्वरूपेणशरीरेरक्षंति तथाच भा

विनायत्तत्वप्रभोगानुकूलकर्मावबद्धप्राणधार

णोसहजन्निसोपाधिकचैतन्यस्यैवदृश्यते नत्व

न्नयाथ नाडीनांप्राणसंचारयोग्यतापि एवंच

स्मतिनप्राणेननापानेनमर्त्योजीवतिकश्चन

इतरेणतुजीवंति यस्मिन्नेतावुपाश्रितावि॑ति

श्रुत्या जीवप्राणधारणे इतिधातुपात्राच्च प्रा

णनाडीशब्दस्थलतरणयापरमात्मैवोच्यते

कामेश्वरस्यैवप्रारब्धकर्मजन्यशरीरमात्राभावे

द्द्रूतकादिन्यन्यायेनमूर्तिमत्तया तदंतर्यामिसं

भावनैवतन्मामकामेश्वरस्यनाडीतदधिष्ठान

चैतन्यमितिफलितोर्थः ॐकामेश्वरप्राण

वल्लभायै० ४ कामेशोत्संगवासिनी कामे०

श्वरस्योत्संगेवामांकेवसतीति तथा अनेकम

न्मथाकारकामेश्वरोत्संगवासिनीतिललिता

तापनीये ॐकामेशोत्संगवासिन्यै० ५ कामेश

ालिंगितांगी तेनालिंगितमंगीकृतमंगं य

स्याअस्तीति सातथा ॐकामेश्वरालिंगितांग्यै०

कामेश्वरसुखप्रदा कामेश्वरायसुखंप्रददातीति

रि
५०

ति कामेश्वरस्य पत्न्युत्वं ब्रह्मत्वं हंसस्त्रिताम्म
माता त्वाकारात्मकदेवो भूत्वा यज्ञे ह देवानि तिष्ठ
त्युकन्यायात्स्वकीयभक्तानां कामेश्वराभेदरूपं
सच्चिदानंदघनात्मकं मोक्षं ददातीति वा ॐ का
मेश्वरसुखप्रदायै नमः ७ कामेश्वरप्रणयिनी
कामेश्वरस्य स्वस्वरूपपरमानंदघनेयाप्रीतिस्त
द्विषयभूतेत्यर्थः ॐ कामेश्वरप्रणयिन्यै नमः ८
कामेश्वरविलासिनी कामेश्वरस्य विलासः
कार्यात्मना विवर्तः सो ऽस्या अस्तीति सा तथा
ॐ कामेश्वरविलासिन्यै. कामेश्वरस्य विलासः
कार्यात्मना विवर्तः सो ऽस्या तपः सिद्धिः कामे
श्वरस्य तपो जगदालोचनात्मकं सिद्ध्यते नयेति
सिद्धिस्तपसः साधनभूतेत्यर्थः स्त्रीपुरुषात्मनं
कल्पितभेदद्वयाज्जगत्सर्जनसाधनभूतेत्यर्थः स्त्री
पुरुषः ॐ कामेश्वरतपःसिद्ध्यै. ९ कामेश्वरमन ः
प्रिया मनसः प्रिया तथ्यानिरवधिकप्रेमास्पदे
त्यर्थः ॐ कामेश्वरमनःप्रियायै नमः १० ॥
कामेश्वरप्राणनाथा ॥ कामेश्वरस्य प्राणो

हिरण्यगर्भस्तं नायति पालयतीति तथा कामे

श्वरः प्राणनाथो वल्लभो यस्याः सेति तथा ॐ

कामेश्वरप्राणनाथायै॰ ९२ कामेश्वरविमोहि

नी कामेश्वरं विमोहयति स्वयं भिन्नविग्रहवती

सती श्रावांदंपती इति सिद्धिः प्रकारकज्ञानवं

तं करोतीति तथा प्रमेदज्ञानवतस्तद्विपरीतज्ञा

नवत्त्वं मोहस्तं करोति सा तथा अथवा मोहो

नाम बुद्धेरेकालंबनतया तदन्या विषयकत्वंप

रमेश्वरस्य स्वस्वरूपपरदेवता परमानंदसाक्षा

त्कारेणास्यारागेव निष्प्रपततयोपचारेण मोहव

तयात दितरप्रपंचाकारवृत्त्यपाश्रयतादर्श

नेन च मोहयतीति उपचारेनाममोहयतीवे

त्यर्थः अन्तःपुरगतराजानं स्त्रियासक्तमिति

वदंतीत्यर्थः ॐ कामेश्वरविमोहिन्यै॰ ९३ का

मेश्वरब्रह्मविद्या कामेश्वरस्य तत्त्वंपदार्थसा

क्षात्कारभूतेत्यर्थः यस्मात्तादपरो तद्ब्रह्मेति

श्रुतेः ॐ कामेश्वरब्रह्मविद्यायै॰ ९४ कामेश्व

रगृहेश्वरी गृह्यत इति गृहः सर्वज्ञानं तस्ये

त्रि
५८

श्वरी विषयाधिष्ठानभूतत्वेन नियामिकेत्यर्थः
अथवा रुद्राणी रुद्रं उच्यते इति न्यायात्कामे
श्वरो रुद्रेश्वरः तस्या अधिपतिरस्यास्तीति सा
तथा ॐ कामेश्वररुद्रेश्वर्यै॰ १५ कामेश्वराज्ञा
दकरी आज्ञां दंस्मरति जनयस्व रवं परमेश्वरस्य नि
त्यत्वमत्वद्रूपा शक्तिः परदेवतात्मकतयानेक
रोतीति तथा ॐ कामेश्वराज्ञादकर्यै नमः १६
कामेश्वरमहेश्वरी महतीवामावीश्वरीनिरूपा
धिकैश्वर्यवती महान्प्रभुर्वै पुरुष इति श्रुतेः
कामेश्वरस्य महदैश्वर्यमस्या अस्तीति सा त
था भवतीत्यर्थः ऐश्वर्यस्य समग्रस्य धर्मस्य य
शसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भगइ
तीरणात् तमीश्वराणां परमं महेश्वरमिति श्रु
तेः ॐ कामेश्वरमहेश्वर्यै न॰ १७ कामेश्वरी मन्म
थोपासितकादिविद्येत्यर्थः ॐ कामेश्वर्यै॰ १८
कामकोटिनिलया सम्यवति पीठेषु मध्ये काम
कोटिः कांचीपुरपीठ श्रीचक्रमित्यर्थः निलयं गृ
हं यस्याः सा तथा ॐ कामकोटिनिलयायै नमः

१९

कीर्तितार्थदा कीर्तितान् कीर्तनविषयभूता
न् भामसजातीयेच्छाकीर्तितगोचरान्पदार्था
न्ददातीति सा तथा कीर्तिता सती उपास्यदेव
तामेव प्रसन्ना भूयादितीच्छया चिरकालोपासि
ता सती पुरुषार्थानप्रार्थयमानस्यापि स्वय
मेव ददातीत्यर्थः ॐ कीर्तितार्थदायै० १०
इति श्रीचि० तृतीयखंडे द्वितीयवर्णनामा०
र्थप्रकाशनं० १२ लकारिणी तृतीयखं
डे तृतीयवर्णत्वेन वाचकतया अस्या अस्तीति
सा तथा ॐ लकारिण्यै० १ लक्ष्यरूपा रूप्यंते
ज्ञाप्यंते येभिरिति रूपाणि लक्षाणि स्वरूपत
टस्थभेदेन सगुणनिर्गुणपराणि लक्ष्याणि
यया सा तथा रूपते ज्ञायते इति रूपमर्थोप
लक्षणं नाम्नापि लक्ष्यं नामरूपे यया सा तथा
अतो स्वयं मायोपाधिना शब्दार्थभावमाप
द्य प्रपंचाकरणमकरोदिति भावः ॥
ॐ लक्ष्यरूपायै न० २ लक्ष्यधीः निश्चयात्मि

त्रि
५८

59

कासविकल्पनात्मिका अंतःकरणवृत्तयो वि
यस्तास्तूपाधित्वेन प्रतिबिंबाधिष्ठानत्वेन तथा
यथासा तथा वृत्त्यारूढं चैतन्यं ज्ञानमिति वा
चैतन्यमेवाहंवृत्तिर्वेति वेदांतसिद्धांतः जडानां
विषयाणां ग्रहणं तादृशीनां वृत्तीनामस्मा
मर्थ्ये जगत्संबंधप्रसंगेन स्वरूपचैतन्यमंतःक
रणवृत्त्युपहितं फलचैतन्यं तया प्रकाश्यते
तथा च ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपे
क्षिते फलदायितमेवास्य शास्त्रकृद्भिर्निरा
कृतमिति न्यायेन लब्धार्थीस्तत्त्वमस्यादिम
हावाक्यश्रवणजन्यवृत्तिव्याप्तिर्यया सा इ
त्यर्थः अथवाधीशाहेन सर्वज्ञत्वादिकमुप
तेलब्धं ययेति वा यः सर्वज्ञः सर्वविदिति
श्रुतेः ॐ लब्धाधियै नमः २ लब्धवांछि
ता वांछया विषयभूतं वांछितं इष्टफ
लमित्यर्थः लब्धं पूर्वमेव प्राप्तं तद्यया इति
तथा प्राप्तकामेति यावत् लब्धवांछितायै ४

लब्धपापमनोहरा पापप्रधानानिचतानिमनां
सिचपापमनांसिलब्धानिपापमनांसियैस्तेसदा
पापचिन्तकाइत्यर्थः तेषांहराप्रबोधेत्यर्थः
अन्यत्रधर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतादि
तिश्रुतेः तमेतंवेदानुवचनेनब्राह्मणाविविदि
षंति यज्ञेनदानेनतपसानाशकेनेतिश्रुत्या
विदितानां तत्तद्वर्णाश्रमधर्माणामीश्वरार्प
णबुद्ध्याक्रियमाणानामात्मज्ञानसाधनतया
श्रूयमाणत्वात्तदन्येन्यांडुःखप्राप्तिसाधनत्वेन
पापवासनाप्राधान्येडुरधिगम्येत्यर्थः ॐलब्ध
पापमनोहरायै० ५ लब्धाहंकारडुर्गमा अहंका
रोभिमानउपलक्षणं तत्तत्कार्याणामात्मस्वरूसे
पत्तिविशेषाणांलब्धोहंकारस्तामस्यान्नात्
त्मिकोयैस्ते डुःखेनाधिकप्रयत्नेनक्रियमाण
साधनकलापेनाधिगंतुंज्ञानाशक्यासत्वगुणा
भावेदेहेन्द्रियादौस्वरूपप्रकाशणाभावात् मनःस्थै
र्याभावेनरजसः प्रवर्तकस्यतेपकस्यतमसश्चा
वरणप्रधानस्याविवेकज्ञानप्रतिबंधकस्यनिद्रा

शि
९०

तस्यादिसमुद्भवस्य कार्येणतापितादिरूपेण श्रेयो
मार्गसाधनानुष्ठानेनगुरुवेदयोः श्रद्धालयैवाह्यवि
षयेसंपादनव्यये मनसिलाभालाभहेतुकहर्ष
शोकजन्यरागद्वेषपरतंत्रे अनात्मतासागरसंपति
मतोचित्वेनभातीत्यर्थः प्रसवनजननमरणाविवा
हरूपसंसारमेवानुभवंति तानहंद्विषतःक्रूरान्
संसारेषुनराधमानितिभगवद्वचनात् अतोनिर
भिमानपुरुषेणस्वाभीष्टलाभायचित्तेसदावि
तनीयेत्यर्थः संन्यासयोगाद्यतयः शुद्धसत्वाइ
तिप्रमाणेभ्य इतिद्रष्टव्यं गेंलब्धाहंकारदुर्गमा
यै० ९ लब्धशक्तिः लब्धाशक्तिः सकलसामर्थ्य
हेतुभूतामायात्मिकाययासातया तेथ्यानयो
गानुगताअपश्यन्देवात्मशक्तिंस्वगुणैर्निगूढा
मितिश्रुतेः गेंलब्धशक्तयेन० ७ लब्धदेहा
लब्धोदेहोविग्रहोययासातथास्वेच्छावलंबित
मूर्तिर्भूतकाठिन्यन्यायेन जीवत्वाभावेनकर्माधी
नत्वाभावात् तथाच सति अप्यस्तमायाशक्ते
र्भेदवत्वं स्वाभाव्यत्वेन ॥

60

पतिश्च पत्नी चाभवदिति श्रुत्या चेदं पतिमूर्तिम·
तीचार्द्धेत्यर्थः ॐ लव्धदेशायै· ८ लव्धैश्वर्यस
मुन्नतिः ऐश्वर्याणां समुन्नतिः आधिक्यं पर्यव·
सानमित्यर्थः लव्धा ऐश्वर्यसमुन्नतिर्यया सात
था तमीश्वराणां परमं महेश्वरमिति श्रुतेः
नांतोऽस्ति मम दिव्यानामिति स्मृतेश्च एष सर्वे
श्वर एष सर्वज्ञः एषोंतर्यामी एष योनिः सर्वस्ये
ति श्रुतौ निरुपाधिकमहैश्वर्यसंपन्नेः तदुपा
सकानामगस्त्यादिमहर्षीणां दर्शनात् तदी
यमहदैश्वर्यनिरवधिकत्वमिति किमु वक्तव्य
मितिज्ञायते इत्यभिप्रायः ॐ लव्धैश्वर्यसमुन्न
तये· ९ लव्धवृत्तिः वृहनमिति व्याभिः परि
पूर्णतेत्यर्थः अवयवोपचयात्मिका सती
कर्मजन्यत्वेन विनाशहेतुत्वात् स वा एष महा
नज आत्मा न वर्धते कर्मणेति वचनात् निष्क
लं निष्क्रियमित्यवयवमात्रनिषेधाच्च तथाच
लव्धवृद्धिः सर्वव्यापकत्वात्स्वस्वरूपैव समस्तपादि
भिर्जीवैस्तदाश्रयभूतैरभिव्यज्यते तत्त्वविधा

मनारोप्यते इति निष्कर्षार्थः ॐ लब्धहृद्यैन॰ १०
लब्धलीला लीलाअन्यप्रयोजनार्थव्यापाराः स
हर्षमात्रहेतुका वा तत्कालोचितशृंगारादिनव
रसांगीकारसमसमयतदुचितभंगीविशेषा वा
लब्धा यया सा तथा ॐ लब्धलीलायैन॰ ११ ल
ब्धयौवनशालिनी अस्तित्वजननवर्धनभाववि
कारावस्था बाल्यपरिणामोपचयोनाशजराव
स्थां तदा देहाभावेन तदुभयनिषेधे अर्थाद्यौव
नेयो निगच्छतीति युवा दृढबलवीर्यस्तस्य भावो
यौवनं तदुभयवयोवस्थारहितमनेकस्वरूपव
तीति भावः ॐ लब्धयौवनशालिन्यै नमः १२ ल
ब्धातिशयसर्वांगसौन्दर्या सुन्दरस्य रुचिरस्य
भावः सौन्दर्यः अवयवानां सर्वेषां सौदर्यं अ॰
तिशयि सर्वांगेषु सर्वावयवेषु लब्धा यया
सा तथा तथा सर्वात्मकतया सर्वकर्तृत्वादिति
भावः ॐ लब्धातिशयसर्वांगसौन्दर्यायै॰ १३
लब्धविभ्रमा लब्धा विभ्रमो यया सा लब्धविभ्र॰
मा सर्वजगत्कारणमित्यर्थः ॐ लब्धविभ्रमायै॰ १४

गेंलब्धविभ्रमायै· १४ लब्धरागा निरस्तविष
यासंगेन निरुध्यस्वमनोहृदि यदायात्युन्मनी
भावं तदाप्नोति परमं पदं भ्रूमध्याद्दृष्टमेस्थानेब्र
ह्मरन्ध्रादधस्तले मनोन्मनीति कथितं तद्रूप
पापरदेवता लब्धः सजातीयकामः रागः सोका
मयतेति श्रुत्या जगत्सर्जनस्य कामनापूर्वकस
निपादनात् लब्धो रागो यया सा तथा गेंलब्ध
रागायै· १५ लब्धपतिः लब्धः स्वेच्छयैव स्वयंव
रेपतिः कामेश्वरो यया सा तथा गेंलब्धपतये· १९
लब्धनानागमस्थितिः आसमंतान्नानाप्रका
रैः कर्मोपासनाज्ञानकांडतत्प्रदंतगततत्त्वादिभि
र्गमयंति स्वार्थान्प्रकाशयन्तीत्यागमः वेदा
नानाअनेकशाखाप्रभिन्नसामादयस्तेषां स्थि
तिः परिपालनं लब्धा यया सा तथा नानागमस्थि
तिर्वेदचतुष्टयोक्तमर्यादाकांडत्रयविषया लब्धा
यया सेति वा संसारस्थानादित्वेन निरपेक्षप्रमा
णभूतान्वेदा सर्वे वेदा यत्रैकीभवंतीति श्रुतेः
स्वस्वरूपभूतान्महाप्रलये संरक्ष सर्गादौ जाय

त्रि
६२
62

माणहिरण्यगर्भस्यान्नानतिरेकेणतानेवप्रति
भासयति स्वयंदंपतीभूत्वातदुक्तधर्मानन्नुष्ठाय
परेषामप्यनुष्ठापयति इतिचवेदशास्त्रे नानवा
प्तमवाप्तव्यंवर्तएवचकर्माणि यदिह्यहंनवर्तेयं
जातुकर्मण्यतंद्रितः उत्सीदेयुरिमेलोकानकुर्या
न्कर्मचेदहमिति भगवद्वचनात् ॐलब्धनानागम
स्थितये· ९७ लब्धभोगा भोगःसुखमात्रानुभवो
दुःखानुभवेऽप्यमानेजीवाविशेषप्रसंगात्लब्धो
भोगोययासातथा जीवचक्रमिवस्वेष्टपदार्थानु
भवानंतरकालीनसुखंनभवति स्वस्यानंदरूप
त्वेनसिद्धस्वरूपतानत्साधनजन्यभोगोप्येतद्विष
येसिद्ध इत्युपचर्यतइति लब्धभोगेत्युच्यते ॐ
लब्धभोगायैनमः· ९८ लब्धसुखा लब्धंसुखमनु
हलवेदनीयंस्वस्वरूपभूतंसुखंनतत्साधनंचय
र्मोययासातथा ॐलब्धसुखायै· ९९ लब्धह
र्षाभिपूजिता लब्धोयोहर्षस्त्वमितिनिमित्तकचि
त्तोल्लासविशेषोसुखप्रसादशरीरपुष्ट्यादि
कामोज्ञेयः जगन्मांसाभीष्टपदार्थानुभवादि

जन्यः संतोष इति प्रसिद्धस्तेनाभिपूरिता समंता
दन्यूनानतिरेकेणाभिन्नरूपतया पूरिता भरिता
तद्विपरीतदुःखाद्यनुभावेन मनागप्य समाश्रय
नित्यप्रसन्नस्वभावेत्यर्थः ॐ लवणहर्षाभिपूरिता
यै नमः १० इति श्री त्रिशतीनामार्थप्रकाशि
कायां तृतीयखंडस्तृतीयवर्गनामार्थकं नाम.

१४

ॐ ह्रींकारमूर्तिः वाच्यवाचकताभेदसंबंधेन ह्रीं
कारो मूर्तिर्विग्रहो यस्याः सा तथा ॐ ह्रींकार
मूर्तये. १ ह्रींकारसौधशृंगकपोतिका यथा
मध्ये सौधस्तथा विकारो हालिकेत्यर्थः तथा
शृंगं शिखरं चन्द्रशालाभित्युपरिभागो निरूपा
धिकविश्रांतिजन्यसुखानुभवहेतुतया ह्रीं
कारस्य सौधोपमात्र हकारस्य श्वेतवर्णतया
अट्टालिकासदृशं रेफस्य लोहितरूपतया इ
ष्टिकादिकृताभित्युपमा हकारोपरीकारस्य शृं
गोपमा ऊर्ध्वगतिसामान्यात्तदुपरितनविंदुः सर्व
प्रकृतिभूतशब्दार्थात्मकतया तदवयवत्वेन वि
चित्रस्वरूपोपि सत्त्वतया पवरकगतिकयोति

कांतेवज्रागत्काहृद्यपतेइति तदर्थत्वेन परदेवतो
पमानशब्देनाभिधीयते तथाच प्रदीपकालंका
रसिद्धेरितिभावः ॐ क्रींकारमाथस्तृंगकपोतिका
यै॰ २ क्रींकारदुग्धाब्धिस्तथा देहान्निष्पन्नंदुग्धंस्त
नगतस्यपयसः स्त्रीयत्वापादनहृस्तादिक्रियावि
शेषोदोहउपलक्षणशोषणादीनामनंतोदक
प्रसारितनिम्नभूप्रदेशाब्धिरुच्यते आपोधीयंते
स्मिन्नितितथा तस्मिन्संजीवकत्वंधर्मः डिम्बसं॰
जीवनेस्तन्यादौदर्शनात् क्रींकारस्यहृकारयुक्त
त्वेनश्वेतवर्णत्वात् अमृतत्वहेतोश्चतत्साहश्य
तस्यस्तथैवस्तथातदभिव्यक्तत्वाविशेषात्तस्यैव
कानांनित्यत्वेसति बहुविधमहिमशालितया
दर्शनादितिभावः ॐ क्रींकारदुग्धाब्धिस्तथायै॰ ३
क्रींकारकमलेन्दिरा क्रींकारबीजस्यविचित्रवर्ण
तयापरमाश्मोतिविषय तथाच कमलोपमानत्॰
स्यवाच्यार्थतयातदुपरितनत्वेनसर्वपुरुषार्थः
प्रदत्वाच्चकमलाशब्देनाभिधीयते तस्याःपद्मा
लयत्वात् क्रींकारकमलस्येन्दिरातदधीनब्रह्म
विषयेत्यर्थः ।

गें ह्रींकारकमलेंदिरायै॰ ५ ह्रींकारमणिदीपाः

र्चिः आदित्ये विकाशुपद्वानभिभूतत्वेसतिचि

रकालावस्थायित्वमणिदीपसादृश्यं ह्रींका

रस्यतस्यप्रकाशोतितनसाधारणोमहातिश

यस्तेनानर्घ्यत्वमावेदयति तदुपासकस्यनिरु

पाधिकामहत्वापादकह्रींकारवाच्यतयातत्प्र

काशिकेत्यर्थः गें ह्रींकारमणिदीपार्चिषेनमः

ह्रींकारतरुशारिका तारयतिफलार्थिनःसा

नूर्ध्वान्यपतनादेरक्षरयतीतितरु तस्यशारिका

पिंगलंगचरणाशारिकाप्रभ्यासातिशयेनमनु

ष्यभाषामपिभाषतेभूतभविष्यद्वर्तमानलोक

यात्रापरिज्ञानीसातीशुभाशुभफलप्राप्तिंचस्व

भाषयावदति अस्यबीजस्यवाच्यार्थतयातत्सेव

धिनीवेदवाचासर्वप्रकाशयतीत्यर्थः गें ह्रींका

रतरुशारिकायै॰ ६ ह्रींकारपेटकमणिः वरुण

साधनतया ह्रींकारःपेठकेनदृष्टांतीक्रियतेत

स्यमणिर्वैदूर्येमित्यर्थः यथाक्षीरादिमणिः

पीठिकादौगोपितोपिस्वकांत्यावाह्यभ्यंतरंतस्य

त्रि
६४

64

प्रकाशयन्नितरपेटकेभ्यस्तं व्यावर्तयति तदेवम
पिवीजस्यवाचकतयेतरवर्णेभ्यो निरतिशयमहि
माभेदयतीतिभावः ॐ ह्रींकाररूपेटकमणये·
ह्रींकारादर्शबिम्बिता अस्यवीजस्येश्वरप्रमा·
णानपेक्षत्वे वेदान्तर्गततया निर्दोषत्वादादर्शसा
म्यं तस्मिन्बिम्बिता प्रतिबिम्बिता मायाप्रतिबिम्ब
चैतन्यस्य जगत्कारणतया सर्वज्ञदर्पणेश्वरत्वमि
वप्रतिफलितादिति तात्पर्यार्थः ॐ ह्रींकारादर्श
बिम्बितायै नमः ८ ह्रींकारकोशासिलता ह्रीं·
काररूपकोशस्तस्यासिलताप्रतिदीर्घा खड्गमि
त्यर्थः सर्ववैराग्यजन्यदुःखनिवर्तकत्वमपि ल
तायाश्च परदेवताया अपितथात्वेन बहिःप्रक
टनायोग्यतासादृश्येनाप्यासकापेक्षकार्यां ह्री
कारस्यवाचकशब्दतया अर्थावरकत्वोपम्यादसि
कोशतुल्यता तथा च ह्रींकारकोशे विद्यमानापि
लतेव दुःखनिवारकत्वे सति भक्ताभयं करोतीत्य
र्थः सर्वेषामापृथग्विशेषाणामसिपरस्वरूपलत
ां महद्भयं वज्रमुद्यतं भीषास्माद्वातः पवतेश्मा

दिष्कृतेः ॐ ह्रींकारकोशासिलतायै· ८ ह्रीका
रस्थाननर्तकी ह्रीकारपदस्थानेसभामंडपेत
स्याश्रयत्वात्तस्य नर्तकी नटी संबद्धासंबद्धभूसं
योगचरणविन्यासोपलक्षितनानानृत्तादिरूपा
दिश्रंगचेष्टानर्तकतत्कर्त्री नर्तकी ह्रीकारवाच्या
र्थतयामाययादिसंबंधासंबंधनिमित्तकमिति
कविचित्रतरकार्योत्पादनव्यापारानुकारविका
र्यविकार्यस्वरूपवत्तयादृष्टलोकस्य मनोवृत्ति
भेदेनतीव्रमन्दमन्दतरधीविद्रूपाभक्तिविषय
तयाभिव्यक्तामभिव्यक्तेः सफलसाधनतयास्व
कीयगुणपादितारतम्येनबुद्धिशुद्धिभेदात्प्रतिभा
तीत्यर्थः ॐ ह्रींकारस्थाननर्तक्यै न· ९ ह्रीका
रशुक्तिकामुक्तामणिः ह्रीकारपदशुक्तिकानी
लदृष्टित्रिकोणाकारात्तस्याः शुक्तिकेवमुक्ताफ
लमिवाभिव्यज्यमाना यथास्वातीमहानक्षत्रेस
वेदेशेशुभमेघसंघातात्पतन् जलबिंदुः शुक्तिको
तःपतितः समुद्रदेशविशेषेमुक्ताकारेणपरि
णमते तथा [illegible]तमोगुणार्थैक ह्रीवी

ज्ञावच्छेदेनमनोहरवाचामगोचरमुत्तरपरदेव
तामूर्त्ताकारेणस्फुरत्या सर्वगतमपिचैतन्यंविशि
ष्टाभिव्यज्यते तथाच मौक्तिकार्थिनांशुक्त्युपा
दानवत्परदेवतासाक्षात्कारेप्सुनाह्रीकारोपा
दानमावश्यकमितिभावः गंह्रीकारशुक्ति
कामुक्तामणयेनमः ॥ ह्रीकारबोधिता सि
द्धपदार्थेइंद्रियादिसम्बन्धेसति स्वतएवज्ञानो
त्पत्तिदर्शनान्नज्ञाने विधिरपेक्षितः क्रियाफ
लत्वाभावात् नहि नित्यापरोक्षधर्मादिज्ञानव
च्छब्दब्रह्माभेदोवेदैकदेशे ह्रीकारेणैवबोध्य
ते अज्ञातज्ञापकत्वेनवेदस्यस्वतःप्रमाण्याभ्यु
पगमात् परचैतन्यस्यचज्ञायमानस्यपरमानंद
रूपतयापुरुषार्थरूपत्वात् अतोह्रीकारेणैव
मूलमंत्रात्मनाबोधिताज्ञापिताहकाररेफई
काराणांव्यस्तत्वदशायांभिन्नाभिन्नार्थकानां
मेलने ह्री बीजात्मनापरिणामेसच्चिदानंद
स्वरूपा श्रीत्रिपुरसुन्दर्यास्तदर्थत्वेनेहैतत्स्वरू
पतयाप्रतिभावात् नान्योतोस्तिइष्टेदर्थे सर्वं

यद्यमात्मा प्रकाशवद्विभूतात्मा भूते भूते व्यवस्थि
तः एकदा बहुधा चैव दृश्यते जलचंद्रवत् इत्यादि
वदात्मा द्रष्टव्यः तद्विजिज्ञासस्वात्मानं पश्येदित्या
दि लिङ्लोट्तव्यप्रत्ययानां महार्थकतयानवि
दितमिति सिद्धान्तः ॥ ह्रीं ह्रींकारबोधिन्यै नमः

१२

ह्रींकारमयसौवर्णस्तंभविद्रुमशाखिका पिंगलः
पृथिवीरेणुः सुवर्णमित्युच्यते घृतक्षियमानद्र
वत्वस्य नैमित्तिकत्वेनोजसौंतरेप्रदीपप्रभादानद
र्शनात् पदार्थांतरसंयोगे रजतादिवदग्नितेजः
संयोगात् भस्मभावापत्तेश्च हीरमरेणौ लोहत्वले
श्यतावभावेपि पार्थिवत्ववदत्र पार्थिवत्वेबोधका
भावात् द्रव्यस्योदकस्वभावत्वेनतत्कार्यपृथिव्या
मणुपलेपोपपत्तेश्च तद्विकारः सौवर्णः सौवर्ण
श्चासौ स्तंभश्च सौवर्णस्तंभश्च नवरत्नमंडपभार
वाहित्वे सति तदभिन्नत्वे सति तदलंकारभूतत्व
स्यैव साधर्म्यस्य ह्रींकारेपि जगदाश्रयत्वे सतित
त्कारणत्वेन दंतधृतत्वे सति परमानंदजनक
त्वस्य सत्वेन ह्रींकारमय इत्यभेदोपचारः प्रदी

त्रि॰
६६

68

मकालंकारयोगत्वनार्थइतिज्ञेयं उपमेयेह्रींकारस
योवर्णार्थइतिज्ञेयं उपमेयेशाब्देनोपमानाभेदक
ल्पनानतस्मिन्निविंत्रेपिंगलप्रधानत्वपेतस्तंवथ
तथाविद्रुममण्डपिकेवप्रतीयमानाविद्रुमेणप्रवालेन
कृता पुत्रिकाशालभंजिका सौवर्णस्तंभ शब्दउ
पलक्षणं भित्त्यादीनांआयस्त्वदर्शनात् तदुपास
नेस्वतोमनोज्ञस्तंभस्यातिदर्शनीयतायेद्रस्तंभत
तप्रवालपुत्रिकास्तंभमंडपंतत्स्वामिनेतद्देशंचप्र
कटीकरोति तथा श्रीपरदेवतापिद्रुप्यतयेतद्ही
नार्थ तथा तदवच्छिन्नासती तदानींसर्वान्भूष
यति सकलीकरोतीत्यर्थः ॐह्रींकारमयसौव
र्णस्तंभविद्रुमपुत्रिकायैनमः १२ ह्रींकारोवेदो
पनिषत् वेद्यंतेज्ञायंतेनसर्वेपदार्थाअनेनेतिवेदः
जातावेकवचनं ह्रींकारएववेदोज्ञापकत्वावि
शेषात् उपनिषद्वेदांतभागोलक्ष्यार्थोवा तद्र
ह्स्योपनिषत्परमितिश्रुतेः कर्मोपासनाज्ञानाज्ञा
नकांडभेदेनचत्वारोपिवेदास्त्रिप्रकाराः नमतेवेदा
द्यवचनेनेतिवाक्येनज्ञानसाधनतयाज्ञानाज्ञानयो
र्विनियुक्तत्वात् ।

अंधंतमः प्रविशंति ये विद्यामुपासते ततो भूय इव
ते तमो य उ विद्यायां रताः इति श्रुत्या तदुभयोः
संसारफलकत्वेन निंदितत्वाच्च आत्मानंचेद्विजा
नीयादयमस्मीति पूरुषः किमिच्छन्कस्यकामा
य शरीरमनुसंज्वरेत् आत्मकाम आप्तकाम इत्या
दिश्रुतिभ्यो ह्येतत्ज्ञानोत्पादकभेदभागस्योपनि
षच्छब्दवाच्यस्य मोक्षफलकत्वेन फलप्रतिपाद
नात्तदुभयप्रतिपादकवेदभागापेक्षया श्रेष्ठत्वं
लोके साधनापेक्षया फलस्य श्रेष्ठत्वेनोत्तमत्वप्रसि
द्धे तथाच पूर्वकांडद्वयार्थस्य जन्मतया तत्प्रति
पादकं वेदभागस्योपनिषच्छेषत्ववत् ओंकार
स्यापि परदेवताप्रकाशत्वेन तच्छेषत्वात्तस्याः प्रा
धान्यमुक्तमिति द्रष्टव्यं वेदांतेषूपनिषच्छब्द
ज्ञानकतारूपशाकसंबंधेन वर्तते मुख्यया वृत्त्या
तु ब्रह्मविद्यायामेव तथाहि उपनिषच्छब्दः समी
पेदप्रार्थकः ब्रह्मणाख्यस्त्वमायासमीपदेशस्त
त्पदार्थप्रतिबिंबितमविद्योपाधिकचैतन्यं जीव
शब्दवाच्यमुपशाद्यार्थो लक्षणया प्रतिपाद्यतेति

त्रि

६३

67

शब्दः षत् इतिपदस्यविशेषणं षडिति पदं षट्
विसरणगत्यवसादनेष्वस्ति तथाच उपशान्तो वा
योजीवः अविद्यांनिहत्य कौवलस्वरूपेणानि
षीदतिवर्तत इत्युपनिषत् इत्येकोर्थः जीवोव
लस्वरूपेणनिगच्छतिजानाति इत्यस्यद्वितीयो
र्थः ॐक्लींकारवेदोपनिषदेनमः १४ क्लींकारा
ध्वरदक्षिणा क्लींकारएवाध्वरस्तस्यदक्षिणास
मासिसाधनंदक्षिणायांदक्षायांयज्ञसमाप्तिद
र्शनात् क्लींकारस्यापिजपोयजनात्मकतया
अध्वरेणेति गच्छतीत्यध्वरोमार्गसाधकइत्य
र्थः दक्षिणापदंफलवाचि ऋत्विग्व्यापाराणां
दक्षिणाफलदर्शनात् क्लींकारस्तस्यार्थज्ञा
नमेवक्लींकाराध्वरः क्लींकारज्ञानयज्ञप्रद्योतन
दक्षिणामुखेइतिवचनात् दक्षिणावत्फल
भूतत्वेनप्रधानभूतेतिवा देवतोद्देशेनद्रव्य
त्यागोयागइत्युच्यते त्यक्तद्रव्यस्याग्नौप्रक्षेपो
होमः ऋत्विगुद्देशेनवैयामर्थविभागोदक्षिणा
अर्थिभ्योवेदविद्भ्योद्देशेनार्थविभागोदानमित्येषां
विभागः ।

गेंक्लींकाराधारदलिगण्यैनमः १५ क्लींकारनंदना
रामनवकल्पकवल्लरी नंदयतीतिनंदनः सचा
सौ आरामश्च देवेंद्रोद्यानं विचित्रस्वरूपतयावि·
ज्ञातीयार्थकत्वात् क्लींकारएवनंदनारामः सु
खैकहेतुविश्रामभूमित्वान्नवानूतनाश्रुतिको
मलेत्यर्थः कल्पयतीति कल्पकाकल्पकाचासौ
वल्लरीवल्लीचेति तथादेवेंद्रोद्यानेविद्यमानानां
वृक्षलतागुल्मादीनामेतल्लोकातिशायिपुष्प
फलादिसत्त्वेपिसर्वोत्तमताप्रसिद्धिः कवल्ल्याः
स्तुयथाकर्मयथासेवमुपासकानांसर्वार्थ
प्रदानशक्तिमत्त्वेन सर्वोत्कृष्टताब्रह्मविष्णुरु
द्राणांतद्वाचकवर्णाभिधानानामन्योन्यसंबंध
तयैकत्रप्रतीयमानत्वेनचिरंजीविफलाभिप्र
दानेनानंदकतया संसारतापकत्वेनच क्लींका
रस्यनंदनोपमातत्रसर्वार्थप्रदातृत्वेन कामे
श्वरालिंगितकोमलतरसुंदरमूर्त्याविशिष्टार्थ
पुरुषार्थचतुष्टयकल्पनेन सगुणनिर्गुणो
पासकानांतत्तद्देवतात्मनाप्राधान्येनसमभिव्याहर

त्रि
वि
६८

पतया सातिशयेन नवकल्पकवल्लरीत्युच्यत इति भावः ऐंह्रींकारानंदनारामनवकल्पकवल्ल्यै॰ ।९

ह्रींकारहिमवद्गंगा हिमानिग्रास्मिन्संतीति हिमवान् शीतलताः पर्वतराजः ह्रींकारस्याप्यस्तलादि साधकतयाशीतलतावोध्या तस्माद्गंगेवपरम पावनीसर्वपुरुषार्थप्रदामंत्रदेवतात्मनाभिव्यक्ते त्यर्थः ऐंह्रींकारहिमवद्गंगायै॰ ।१ ह्रींकारार्णवकौस्तुभा कौस्तुभातीराब्धिजन्मसुचतुर्दशरत्ने श्रेष्ठोयथा सर्वाधिकप्रकाशादिगुणतयापर देवतापि अपारमहिमापरिछिन्नह्रींकारमात्रवे द्यत्वेनतन्निष्पन्नासतीप्रत्ययः पुरुषः स्वयंज्योति रितिश्रुतेः सर्वप्रकाशकतयाविद्योततइत्यर्थः तत्रकौस्तुभहृदयस्थलक्ष्मीपतित्वं सर्वदेवोत्तमत्व सकलसुंदरतमत्वगुणाश्चविष्णोः ह्रींकारार्णवेविद्योतमानह्रींकारदेवतोपासकस्यापि नारायणाभेदेन श्रीकामत्वादिधर्माः स्वतएवसिध्यंतीति कौस्तुभपदे नध्वनितमिति द्रष्टव्यम् ऐं

ॐ ह्रींकारार्णवकौस्तुभायै नमः ९८ ह्रींकारमं
त्रसर्वस्वा सर्वाणि तानि तानि वचनानि प्राणि
मायशेश्वर्यजनकत्वादीनि तानि तथा ह्रींकार
घटिता ह्रींकारो वा तेषां सर्वस्वा सकलसंपत् स
र्वार्थसाधकशक्तिरित्यर्थः ॐ ह्रींकारमंत्रसर्व
स्वायै नमः ९९ ह्रींकारपरमसौख्यदा ह्रींकारपरा
ह्रींकारमन्त्रजापका ह्रींकारमंत्रजपदित श्रीविद्या
जपपरास्तेषां सौख्यं चतुर्विधपुरुषार्थप्राप्तिज
न्यमानंदसंददातीति ह्रींकाराणं व्यष्टिरूपे
णवाच्यार्थानां त्रिमूर्तीनां परमसौख्यं सामरस्यस
पकीभावानंदसंददातीतिवार्थः यत्रनान्यत्पश्य
ति नान्यच्छृणोति नान्यद्विजानाति तदल्पं नास्ते
सुखमस्तीति आनन्दंब्रह्मणो विद्वान्न बिभेति
कुतश्चन यथा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनि
रुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदति अथसोऽभयं
गतो भवति विज्ञानमानंदंब्रह्म रातेर्दातुः पराय
णामित्यादि बहुश्रुतिभ्योऽखंडसच्चिदानंदब्रह्म
रूपतयासेवफलं भवति अनन्तानादस्यफलश्च

त्रि
वि
६९

मेरयोगात् ब्रह्मविद्ब्रह्मैव भवति तरति शोकमा-
त्मवित् येनमाशुपयांतिते तेषामहंसमुद्धर्तामृत्यु
संसारसागरात् ब्रह्मैव सन् ब्रह्माप्येतीत्यादि श्रुति
स्मृतिशतेभ्यः स्वस्वरूपावाप्तिरेव पुरुषार्थस्तस्य
प्राप्तिरिति सिद्धम् ॥ ॐह्रींकारपरमौव्यदायेनमः २०
इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्गोविं-
दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवत्पादकृ-
तायां त्रिशतीनामार्थप्रकाशिकायां तृतीयखंड-
गतवर्णनामार्थप्रकाशनं नाम पंचदशं प्रकरणं
समाप्तश्चायं ग्रन्थः ॥ ॐतत्सत् संवत् १९४९ जम्बू

तस्मादवाप्तिभवपुण्यसपेत्यकस्मैलाभायदेवमि-
तरेत्वदर्थीनसृतिं वासः प्रयेतवशिवांकवरास-
नेतं तस्मात्कटाक्षकरुणां मयिदेहि मातः १
याचेगिरीन्द्रतनयेतवपादमूले बद्धांजलिः सवि-
नयं वचसाप्रणम्य तथ्यैव भक्तिभरितेतिनिवसेन्म-
नोमेतद्रूपमेवसकलंप्रतिभाति विश्वम् २॥

